यद्येवं तर्हि अहंशब्दार्थः अहंप्रत्ययगोचरः आत्मेत्येव तन्निरूपणं सुकरम् । किं ज्ञानादिलिङ्गकानुमानोपन्यासव्यसनेनेत्यत्राह—

**१४८. दृष्ट आत्मनि लिङ्गे एक एव दृढत्वात् प्रत्यक्षवत् प्रत्ययः ॥ ११ ॥**

यद्यप्यहमिति प्रत्यक्ष आत्मा तथापि सः शरीरसंपृक्तः पयोमिश्रं नीरमिव न स्फुटो भासते । शरीरमेवाहमर्थं इति मतिर्भवति । तत्र प्रदर्शितरीत्या ज्ञानलिङ्गेन शरीरेन्द्रियादिव्यतिरिक्ततया आत्मनि निश्चिते 'अहं' जानामीति प्रत्यक्षमात्मानं तत्स्थं ज्ञानं च पश्यति । एवं स्वात्मनि दृष्टेन लिङ्गेन परात्मनि यः प्रत्ययो जायते स एक एव दृढत्वात् सन्देहानर्हत्वात् प्रत्यक्षवत् अनुमितिरूपत्वेऽपि प्रत्यक्षतुल्यः प्रत्ययो भवति । एवं च स्वात्मनि अहंप्रत्ययस्य विविक्तविषयत्वसिद्धये परात्मनि दृष्टलिङ्गेन दृढानुमितिसिद्धये च पूर्वं ज्ञानलिङ्गेन आत्मसाधनमिति भावः ॥

अहं देवदत्तः अहं यज्ञदत्त इति प्रत्यक्षं प्रतिपादयता देवदत्तादिसंज्ञाः आत्मवाचिन्यः इत्युक्तं भवति । तथा सति 'देवदत्तो गच्छति' 'यज्ञदत्तो गच्छति' इति व्यवहारः कथम् ? न हि गमनक्रिया आत्मनि समवैति । शरीरवृत्तित्वात् । अत्राह—

**१४९. देवदत्तो गच्छति यज्ञदत्तो गच्छतीत्युपचारात् शरीरे प्रत्ययः ॥ १२ ॥**

अस्मिन् व्यवहारे आत्मवाचिनो देवदत्तादिशब्दस्य शरीरे उपचारः अमुख्यवृत्तिः । तेन औपचारिकोऽयं प्रत्ययः ॥

**१५०. सन्दिग्धस्तूपचारः ॥ १३ ॥**

आत्मवाचिनो यज्ञदत्तादिशब्दस्य शरीरे उपचार इति सन्दिग्धमेतत् । मुख्यवृत्त्या शरीरवाची । उपचारादात्मवाचीति किं न स्यात् ॥

इति शङ्कायां परिहारमाह—

**१५१. अहमिति प्रत्यगात्मनि भावात्, परत्राभावादर्थान्तर-प्रत्यक्षः ॥ १४ ॥**

अहमिति यः प्रत्ययः प्रत्यगात्मनि भावात् अन्यत्र शरीरादावभावाच्च अर्थान्तरप्रत्यक्षः, आत्मरूपं अर्थान्तरं प्रत्यक्षं यस्मिन् तद्रूपः । आत्मप्रत्यक्षरूपः इत्यर्थः । एवं च अहंशब्दः आत्मवाचीति निश्चितम् । अहं यज्ञदत्त इत्यादिसामानाधिकरण्यबलात् यज्ञदत्तादिशब्दोऽपि आत्मवाचीति निश्चीयते । एवं सति यत्र मुख्यार्थस्य बाधो भवति तत्र अर्थान्तरे प्रयोग उपचारादिति स्वयं सिद्ध्यति । तत्र कः सन्देहावसर इत्यभिप्रायः ॥

ननु अहं गच्छामीत्यपि प्रत्ययव्यवहारौ भवतः । कथमत्रोपपत्तिः । न खल्वहमर्थे गमनं समवैति । अत्राह—

**१५२. देवदत्तो गच्छतीत्युपचरात्, अभिमानात्, तावत्, शरीर-प्रत्यक्षोऽहङ्कारः ॥ १५ ॥**

देवदत्तो गच्छतीत्युपचारादित्युक्तम् । अभिमानात् तावत् अहं गच्छामि इति । अत्र अहङ्कारः अहमिति प्रत्ययः व्यवहारो वा । शरीरप्रत्यक्षः शरीरं प्रत्यक्षं यस्मिन् सः । प्रत्यक्षशरीरप्रयुक्तः । शरीरप्रत्यक्षप्रयुक्त इति वा । कथमेवं आत्मविषयः अहंप्रत्ययः शब्दो वा शरीरविषयो भवतीति चेत् अभिमानात् । अन्यस्य अन्यत्वेन ग्रहणं अभिमानः । स्वशरीरं स्वमेव मन्यते पुरुषः । अतः तत्राहमिति प्रत्ययो व्यवहारश्च । देवदत्तो गच्छतीत्यत्र शरीरे देवदत्तशब्दमात्रस्योपचारः, न तु तस्य देवदत्तात्मत्वेनोपचारः । अहं गच्छामीत्यत्र तु उभयोपचारः शरीरस्य अहन्त्वात्मकात्मत्वेन अहंशब्दस्य तद्वाचकत्वेन च । परशरीरस्य परात्मत्वेनोपचारे हेतुर्नास्ति । तस्मात् तत्र शब्दमात्रोपचारः । स्वशरीरस्य तु स्वाविनाभावात् स्वत्वारोपः स्वरसतो भवति । अत उभयथोपचारः । अस्य विशेषस्य ज्ञापनाय अभिमानात् तावदित्युक्तिः । न त्वत्रोपचाराभावः । अर्थान्तरवाचकस्य पदस्य अर्थान्तरवाचकतया प्रयोगे हि उपचारोऽवर्जनीयः ।

एवं अहंशब्दस्याप्युपचार इत्युक्तं श्रुत्वा पूर्वपक्षी पुनः स्वकीयमाक्षेपमुत्थापयति—

१५३. सन्दिग्धस्तूपचारः ॥१६॥

तुकारः आक्षेपद्योतकः। अहंशब्दस्य आत्मवाचकत्वेन निश्चितत्वात् तत्सामानाधिकरण्येन प्रयुक्तो देवदत्तादिशब्दोऽपि आत्मवाचीति सिद्धयति। तेन देवदत्तो गच्छतीत्यादिषु व्यवहारेषु देवदत्तादिशब्दः शरीरे औपचारिक इत्युक्तम्। इदानीं तु अहंशब्दोऽपि शरीरपरः प्रयुज्यत इत्युच्यते। अत्र ब्रूमः। अहंशब्दः शरीरपरः मुख्य एवास्तु। एवं देवदत्तादिशब्दोऽपि। किमुपचाराङ्गीकारेण। मुख्यत्वसंभवे अमुख्यत्वाङ्गीकारायोगात्। अतोऽत्र भवता उच्यमान उपचारः संदिग्धः अङ्गीकारानर्हः॥

पूर्वसूत्रे देवदत्तो गच्छतीत्युपचारात् इत्ययं भागः अनपेक्षितः। अभिमानात् तावदिति हेतुकथनात् उपचारो न तत्रोक्त इति, तेन 'संदिग्धस्तूपचारः' इत्यनेन सूत्रेणोपचारखण्डनमन्यथा नोपपद्यते, इति च मन्यमानैर्योजित इति मन्यामहे॥

इममाक्षेपं परिहरति—

१५४. न तु शरीरविशेषाद् यज्ञदत्तविष्णुमित्रयोर्ज्ञानं विषयः॥१७॥

तुकारः पूर्वपक्षं व्यावर्तयति। समागतौ यज्ञदत्तविष्णुमित्रौ अन्योन्यस्य शरीरविशेषं पश्यतः। परं तु अस्येदानीमिदं ज्ञानं वर्तत इति परस्परस्य ज्ञानं परस्परस्य नैव विषयो भवति। नैव ज्ञातं भवतीत्यर्थः। यदि शरीरगुणः स्यात् ज्ञानं तर्हि तद् ज्ञातं स्यात्। न तु ज्ञानं भवति। तस्मात् शरीराद्यतिरिक्तस्य कस्यचित् गुण इति दुरपह्नवमिदम्। देवदत्तोऽहं जानामीति असन्दिग्धाबाधितप्रतीतिबलात् सः अहमर्थं आत्मेति, देवदत्तादिशब्दः तस्यैव वाचक इति च निश्चीयते। एवं यज्ञदत्तो गच्छति, अहं गच्छामि इति प्रतीतिव्यवहारौ औपचारिकाविति उपपाद्यौ। यदि तु पूर्वपक्षरीत्या अहंशब्दः देवदत्तादिशब्दश्च शरीरस्य मुख्यवाचकौ तर्हि अहं जानामि देवदत्तो जानातीत्यत्र अहंशब्ददेवदत्तशब्दयोरर्थः कः? न तावच्छरीरम्। तस्य ज्ञानाश्रयत्वासंभवात्। नाप्यात्मा। शरीरस्याहमर्थत्वे तदतिरिक्तस्याहमर्थस्याप्रसिद्धेः। असिद्धस्य च औपचारिकतयाऽपि वाच्यत्वायोगात्। तस्मात् इमौ शब्दौ आत्मनि मुख्यौ। शरीरे औपचारिकाविति इयमेव व्यवस्था युक्तेति न सन्दिग्धता

उपचारस्येति ।

आत्मनोऽनागमिकत्वप्रकरणमिदमुपसंहरति :—

**१५५. अहमिति मुख्ययोग्याभ्यां शब्दवद् व्यतिरेकाव्यभिचाराद् विशेषसिद्धेर्नागमिकः ।। १८ ।।**

आत्मा नागमिकः । प्रकारान्तरेणैव विशेषस्य अहन्त्वरूपस्य आत्मत्वस्य सिद्धेः अवधारणात् । किं तत् प्रकारान्तरम् ? अहमिति प्रत्ययस्य व्यतिरेकाव्यभिचारः इतरेभ्यः सर्वेभ्यः व्यावृत्तत्वनियमः । नियमेन व्यावृत्तिरिति यावत् । अहमिति प्रत्ययः प्रत्यक्षात्मकः । लिङ्गविशेषाजन्यत्वात् । साक्षात्काररूपत्वात् । स चायं प्रत्ययः सर्वेभ्यो विषयान्तरेभ्यो व्यावृत्तः आत्मैकविषयः । कस्मात् । मुख्ययोग्याभ्यां अन्वय-व्यतिरेकाभ्याम् । मुख्यौ साक्षादुपलभ्यमानौ । योग्यौ सन्देहविपर्ययरहितौ । आत्मनि भवतीत्यन्वयः । अन्यस्मिन् यस्मिन् कस्मिन्नपि न भवतीति व्यतिरेकः । शब्दवदिति दृष्टान्तः । "अहमिति शब्दस्य व्यतिरेकान्नागमिकं" इति पूर्वमुक्तम् । तद्वत् अहमिति प्रत्ययस्यापि व्यतिरेकाद् विशेषसिद्धेर्नागमिक आत्मा ।

अथात्मनः सङ्ख्यामाह—

**१५६. सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यम् ।। १९ ।।**

ऐकात्म्यं आत्मनः एकत्वम् । तदभ्युपगन्तव्यम् । कुतः ? सुखाद्युत्पत्तिविषये अविशेषात् । शब्दस्य सर्वत्रोपलम्भादाकाश एक इत्युक्तम् । परापरव्यवहारस्य सार्वत्रिकत्वात् तत्कारणभूतः कालः एक इत्युक्तम् । तथा सुखदुःखादेः सर्वेषु शरीरेषूपलम्भात् तदाश्रय आत्मापि एको भवितुमर्हतीति पूर्वः पक्षः ।।

सिद्धान्तमाह—

**१५७. नानात्मानो व्यवस्थातः ।। २० ।।**

आत्मानः नाना बहवः । कुतः ? सुखदुःखव्यवस्थानात् । यदा एकस्मिन् शरीरे सुखं वा दुःखं वाऽनुभूयते तदा तत् सर्वस्मिन् शरीरे नानुभूयते । यद्येक एवात्म तर्हि सर्वत्र तदनुभवेन भाव्यम् । न परं एवं एकस्य सर्वत्रानुभवाभावः । अपि तु विपरीतानुभवोऽप्यस्ति । यदा एकः सुखी तदाऽन्यो दुःखी भवति । सुखदुःखे च भिन्न-भिन्ने तारतम्यवती च भवतः । एवं व्यवस्थादर्शनात् प्रतिशरीरं, विभिन्न एक

ग्रात्मेति ग्रनन्ता आत्मानः ॥

१५८. शास्त्रसामर्थ्याच्च ॥ २१ ॥

आत्मनो बहुत्वं सिद्धयति । शास्त्राणि वेदाः स्मृतयश्च । तेषां सामर्थ्यं तात्त्विकार्थबोधकत्वशक्तिः । "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां शान्तिः शाश्वती नेतरेषाम् ।" "वीतरागभयक्रोधा मन्मया मामुपाश्रिताः । बहवो ज्ञानतपसा पूता मद्भावमागताः ॥" इत्यनयोः श्रुतिस्मृत्योः ग्रात्मनां बहुत्वं कण्ठोक्तम् । तदस्तु । तत्तद्विधिनिषेधपराणि सर्वाणि प्रमाणवचनानि साधुकर्मकारी समीचीं गतिमाप्नोति, असाधुकर्मकारी दुर्गतिं गच्छतीति बोधयन्ति ग्रात्मनानात्वं सुस्पष्टं ज्ञापयन्तीति, "शास्त्राच्च" इत्येवं असूत्रयित्वा "शास्त्रसामर्थ्याच्च" इति सूत्रयतो भावः ॥

इति कणादसूत्रवृत्तौ सुगमायां

तृतीयाध्याये द्वितीयमाह्निकम् ॥

---

## अथ चतुर्थाध्याये

### प्रथममाह्निकम्

द्रव्यनिरूपणं केनचित्प्रकारेण वृत्तम् । द्रव्येषु आत्मनो भोक्तृत्वेनातिप्रधानत्वात् तदन्ततया तन्निरूपणम् । अथ प्रकारान्तरेण तन्निरूपणमस्मिन्नध्याये क्रियते । तत्र पृथिव्यप्तेजोवायूनां नित्यानित्यभेदेन विभागमभिप्रेत्य प्रथमं नित्यलक्षणमाह—

**१५९. सदकारणवन्नित्यम् ।। १ ।।**

यत् सत् विद्यमानं अकारणं कारणरहितं च तत् नित्यमित्युच्यते । उत्पत्तिरहितस्य भावपदार्थस्य नाशविरहात् तदपि लक्षणेऽन्तर्भूतम् । उत्पत्तिविनाशरहितं वस्तु नित्यमिति पर्यवस्यति ।।

तत्सत्त्वे किं प्रमाणमित्यत्राह—

**१६०. तस्य कार्यं लिङ्गम् ।। २ ।।**

घटपटादीनि कार्यद्रव्याणि सावयवानि पश्यामः । तेषां नाशे हि शकलानि दृश्यन्ते । एतान्यपि सावयवानि । तेषां भेदे अल्पतरशकलदर्शनात्, अनेन क्रमेण परीक्षणे यश्चरमोऽवयवः स निरवयवोऽभ्युपगन्तव्यः । पूर्वपूर्वावयवस्यापि सर्वस्य सावयवात्त्वे घटारम्भका अवयवा अनन्ताः स्युः । कुसूलारम्भका अवयवा अपि तथा । तथा सति घटकुसूलयोः अनन्तावयवारब्धत्वे समाने सति घटोऽल्पपरिमाणः कुसूलो महापरिमाण इति परिमाणभेदो न स्यात् । चरमावयवस्य निरवयवत्त्वे तु यावन्तः तादृशा अवयवाः घटस्यारम्भका तावद्भ्योऽधिकाः तादृशा अवयवाः कुसूलारम्भकाः । अतस्तयोः परिमाणभेदः इति शक्यं तदुपपादनम् । तस्मात् घटपटादिकं कार्यं वस्तु स्वकारणभूतं स्वयं कारणरहितं अत एव नित्यं वस्तु किञ्चिदस्तीति गमयति ।

तदुच्यते तस्य कार्यं लिङ्गमिति। यदेवं नित्यं वस्तु सिध्यति तस्य परमाणुरिति व्यवहारः॥

कार्यात्कारणानुमानं साधु। कारणात् कार्यानुमानं तु असाधु, इति पूर्वोक्तं स्मारयन्नाह—

**१६१. कारणभावात् कार्यभावः ॥ ३ ॥**

कारणस्य सत्त्वे हि कार्यस्य सत्ता। न तु तस्य असत्त्वे। अतो व्याप्तिसत्त्वात् सद्धेतुरयमिति भावः। ननु कार्यात्कारणं सिद्ध्यतु। तन्नित्यमिति कथं सिद्ध्येदिति चेन्न। परिमाणविशेषविशिष्टं हि कार्यं तदनुगुणमेव कारणमनुमापयति। नित्यमेव च चरमं कारणं तदनुगुणम्॥

एवं परमाणुरूपं नित्यं कारणं प्रसाध्य तस्य ये अनित्यत्वमाहुः तान् निरस्यति-

**१६२. अनित्यमिति च विशेषतः प्रतिषेधभावः ॥ ४ ॥**

परमाणुरूपं कारणद्रव्यं अनित्यं, रूपादिमत्त्वात्, घटादिवत् इति यः नित्यत्वप्रतिषेधः क्रियते सः विशेषतः प्रतिषेधः। कारणद्रव्यस्यानुमीयमानस्य अनित्यत्व-रूपेण विशेषेण प्रतिषेधः। न तु स्वरूपेण। परमाणुमभ्युपेत्य तस्य नित्यत्वं प्रति-षिद्ध्यत इति यावत्। अयं प्रतिषेधः तदा भवेत् यदि नित्यत्वानित्यत्वविशेषावधारणं विना परमाणुस्वरूपं अस्माभिः साधितं भवेत्। निरवयवं अतएव नित्यं किञ्चित कारणमस्ति। स एव परमाणुरिति ह्यस्माभिः साध्यते। तत्र धर्मिग्राहकप्रमाणेन नित्यत्वेनैव तत्सिद्धौ तस्यानित्यत्वानुमानं कालात्ययापदिष्टं भवतीति भावः। बाधितमि-ति यावत्। "विशेषतः प्रतिषेधाभावः" इति पाठे "अनित्यमिति विशेषतो यः प्रतिषेधः तस्याभावः" उक्तरीत्याऽनवकाश एवेत्यर्थः। न परं साधकप्रमाणसत्त्वात्, बाधक प्रमाणाभावाच्च नित्यपरमाणुसिद्धिरिति चकारार्थः॥

**१६३. अविद्या च ॥ ५ ॥**

अथोच्यते परमाणुरेव नाङ्गीक्रियते, नतरां तस्य नित्यत्वमिति, तत्र ब्रूमः। तथा सति अविद्या अनुमित्यात्मकविद्यायाः ज्ञानस्याभावः। पक्षाभावेन हेतोराश्रया-

सिद्धत्वात् । जाता वाऽनुमितिः अविद्या अप्रमैव भवति । अथवा परमाण्वनङ्गीकारे अविद्यापक्षविषयकप्रमाया अभावः । पक्ष एव नास्तीत्युक्तं भवति । पक्षाभावे अनुमानस्य का प्रसक्तिः । तथा च परमाणुमङ्गीकृत्य तस्यानित्यत्वसाधने हेतोरबाधितत्वात्, अनङ्गीकारे अनुमानप्रयोगस्यैवासंभवात् न परमाणोरनित्यत्वापादनं शक्यमिति सूत्रद्वयार्थः ॥

१६४. महत्यनेकद्रव्यवत्त्वात् रूपाच्च रूपोपलब्धिः ॥ ६ ॥

महति द्रव्ये । महत्परिमाणवद्द्रव्यविषयेत्यर्थः । उपलब्धिः प्रत्यक्षं भवति । कुतः । अनेकद्रव्यवत्त्वाद्रूपाच्च । अनेकं बहु यावद्द्रव्यं स्वकार्ये महत्परिमाणं जनयितुं शक्तम्, तावदिह अनेकद्रव्यमिति विवक्षितम् । तत् समवायिकारणतया अस्यास्तीति अनेकद्रव्यवत् । तस्य भावः तस्मात् । महत्परिमाणं नित्यमनित्यं चेति द्विविधम् । नित्यमाकाशादिगतम् । अनित्यं घटादिकार्यद्रव्यगतम् । अस्य कारणं अनेकद्रव्यवत्त्वम् । अनयोः कार्यकारणभूतयोः अनित्यमहत्परिमाणानेकद्रव्यवत्त्वयोः अन्यतरत् कारणं बाह्यद्रव्यचाक्षुषप्रत्यक्षे इति "महति अनेकद्रव्यवत्वात्" इति सूत्रं प्रणयतो भावः । रूपाच्च । रूपं चापरं कारणं उक्तप्रत्यक्षे । अनेकद्रव्यवत्त्वस्य, तदधीनमहत्त्वस्य चाभावात् परमाणौ न प्रत्यक्षम् । रूपाभावात् न कार्ये वायौ । उभयसत्त्वाद्घटादौ प्रत्यक्षम् ॥

एवं कारणद्वयाङ्गीकारप्रयोजनं सूत्रकारः स्वयमेवाह अनन्तरसूत्रद्वयेन—

१६५. अद्रव्यद्रव्यत्वात्परमाणावनुपलब्धिः ॥ ७ ॥

न विद्यते समवायिकारणं द्रव्यं यस्य तत् अद्रव्यम् । तच्च तद् द्रव्य च अद्रव्यद्रव्यम् । तत्त्वात् । पूर्वोक्तयोः द्वयोः कारणयोः प्रथमस्य अनेकद्रव्यवत्त्वस्याभावादित्यर्थः । निरवयवनित्यद्रव्यं हि परमाणुः । अतः तत्र प्रत्यक्षाभावः ।

१६६. रूपसंस्काराभावाद् वायोरनुपलब्धिः ॥ ८ ॥

रूपमेव संस्कारः कार्यद्रव्याणां प्रत्यक्षत्वयोग्यत्वापादको गुणः । तस्य विरहात् वायोरप्रत्यक्षत्वम् ॥

नित्यानित्यभेदेन द्रव्यविभागमभिप्रेत्य तत्र नित्यं अनित्येन साधयामास। कुत एवमनुमानेन साधनं, प्रत्यक्षमेव किं न सम्भवतीति शङ्कां परिहरन् प्रत्यक्ष-कारणमुक्त्वा तदभावात् प्रत्यक्षं न सम्भवति इति प्रतिपादयामास। अथ प्रत्यक्ष-कारणप्रसङ्गात् गुणप्रत्यक्षकारणमपि वदन् प्रथमं प्रस्तुतरूपप्रत्यक्षस्यैव कारणमाह—

१६७. अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ॥ ९ ॥

अनेकं बहु द्रव्यं समवायिकारणं यस्य तत् अनेकद्रव्यम्। महत्परिमाणवद्द्रव्य-मित्यर्थः। तत्र समवायात् समवायसंबन्धेन वृत्तेः, रूपविशेषात्, अनुद्भूतत्वाभिभूतत्व-प्रयुक्तायोग्यत्वावस्थारहितात् रूपाच्च रूपं प्रत्यक्षं भवति। घटपटादिरूपे इदमुभय-मस्ति। अतस्तत्प्रत्यक्षम्। अनेकद्रव्यसमवायाभावात् परमाणुरूपानुपलब्धिः। अनु-द्भूतत्वात् निदाघोष्मादौ रूपानुपलब्धिरित्याहुः। अभिभूतत्वात् उष्णजलसंपृक्ताग्नि-रूपानुपलब्धिः॥

१६८. तेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम् ॥ १० ॥

तेन रूपेण, रसगन्धस्पर्शेषु यद् ज्ञानं तत् अनेन कारणेनेति व्याख्यातम्। अनेकद्रव्यसमवायात् रसविशेषाच्च रसोपलब्धिः। अनेकद्रव्यसमवायाद् गन्ध-विशेषाच्च गन्धोपलब्धिः। अनेकद्रव्यसमवायात् स्पर्शविशेषाच्च स्पर्शोपलब्धिः। इति रूपस्येव एषामपि उपलब्धिकारणमनुसन्धेयमिति भावः।

ननु रूपं यथा स्वप्रत्यक्षे कारणं तद्वत् गुणान्तरप्रत्यक्षेऽपि कारणम्। तत्र पृथिवीजलयोः रूपवत्त्वात् तद्गुणयोः गन्धरसयोः प्रत्यक्षं भवतीति उपपन्नमिदम्। वायौ तु रूपाभावेऽपि स्पर्शोपलम्भात् कारणाभावेऽपि कार्यसत्त्वरूपो व्यभिचारो भवतीति चेत् अत्राह—

१६९. तस्याभावादव्यभिचारः॥ ११ ।

तस्य रूपस्य वायावभावात् यो व्यभिचार आशङ्क्यते स वस्तुतो नास्ति। कुतः। वायौ स्पर्शप्रत्यक्षे रूपस्य कारणत्वाभावात्। कारणत्वाभावश्च तद्ग्राहकप्रमा-

णाभावात् । पृथिवीजलयोरपि अवर्जनीयतया रूपसन्निधानं तस्य कारणत्वं न ग्राहयतीति एषां गुणानां प्रत्यक्षे एकार्थसमवायितया तस्य कारणत्वं नास्ति । अतः उक्तो व्यभिचारो न भवति ॥

अत्र प्रत्यक्षदाढर्चार्थं अस्ति तु गुणान्तराणां बहूनां कर्मणश्च प्रत्यक्षे रूपस्य एकार्थसमवायेन कारणत्वमित्याह—

**१७०. संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणि ॥ १२ ॥**

सङ्ख्यादयः सप्त गुणाः कर्म च रूपि रूपवद् यद्द्रव्यं तत्र समवायात् समवायसंबन्धेन विद्यमानत्वात् चाक्षुषाणि चक्षुर्जन्यप्रत्यक्षविषया भवन्ति । एषां चाक्षुषप्रत्यक्षे रूपं एकार्थसमवायसम्बन्धेन कारणमित्यर्थः ॥

कुत इत्यत्राह—

**१७१. अरूपिष्वचाक्षुषत्वात् ॥ १३ ॥**

आश्रयद्रव्यस्य रूपवत्त्वे प्रत्यक्षाणि भवन्ति । अन्यथा न । अतः अन्वयव्यतिरेकाभ्यां इदं कारणत्वं सिद्धयति । न चैवं रसगन्धस्पर्शप्रत्यक्षे अन्वयव्यतिरेकौ स्तः । तस्मादत्र रूपं कारणं, न तत्रेति । पूर्वसूत्रे अस्मिंश्च "चाक्षुषाणि, अचाक्षुषत्वात्" इति विशिष्य, चाक्षुषप्रत्यक्षस्य कथनात् चक्षुरिन्द्रियजन्यप्रत्यक्ष एव रूपस्य कारणत्वम् । न तु इन्द्रियान्तरजन्यप्रत्यक्षे । अतः इन्द्रियान्तरविषयरसगन्धस्पर्शप्रत्यक्षे न तस्य कारणत्वमिति व्यभिचारशङ्का निरवकाशेति भावः ॥

एवं व्यवस्थितेन्द्रियजन्यप्रत्यक्षविषयेषु उक्तेषु सर्वेन्द्रियजन्यप्रत्यक्षविषयोऽप्यस्तीत्याह—

**१७२. एतेन गुणत्वे भावे च सर्वेन्द्रियं ज्ञानं व्याख्यातम् ॥ १४ ॥**

एतेन रूपादिप्रत्यक्षनिरूपणेन सङ्ख्यादिगुणकर्मचाक्षुषप्रत्यक्षनिरूपणेन च, गुणत्वसामान्ये, भावे सत्तासामान्ये च, सर्वाणि इन्द्रियाणि कारणभूतानि सन्ति यस्मिन् तत् ज्ञानं सर्वेन्द्रियजन्यं प्रत्यक्षमस्तीति ज्ञापितं भवति । चक्षुषा रूपसंख्यादि-

गुणग्रहणे तद्वृत्तिगुणत्वस्य सत्तायाश्च, एवं रसनया रसस्य, घ्राणेन गन्धस्य, त्वचा स्पर्शस्य च ग्रहणे एषु गुणेषु विद्यमानयोश्च तयोः प्रत्यक्षं भवति । श्रोत्रग्रहणो योऽर्थः सः शब्द इति पूर्वोक्तरीत्या श्रोत्रेण शब्दग्रहणे तद्वृत्त्योः तयोः श्रोत्रजन्यप्रत्यक्षविषयत्वमप्यस्तीति सर्वेन्द्रियजन्यं ज्ञानमनयोः । द्रव्यत्वस्य चक्षुः त्वगिति इन्द्रियद्वयजन्यमेव ज्ञानम् । कर्मत्वस्य चाक्षुषज्ञानविषयत्वमेवेति न सर्वेन्द्रियजन्यं ज्ञानम् ॥

इति कणादसूत्रवृत्तौ सुगमायां

चतुर्थाध्याये प्रथममाह्निकम् ॥

# अथ चतुर्थाध्याये

## द्वितीयमाह्निकम् ।

पृथिव्यादिचतुष्टयं पुनः प्रकारान्तरेण विभज्य किञ्चिदाह—

**१७३. तत् पुनः पृथिव्यादि कार्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकम् ॥ १ ॥**

तत् पूर्वं "तस्य कार्यं लिङ्गं" इति सूत्रे निर्दिष्टं पृथिव्यादिचतुर्द्रव्यरूपं कायद्रव्यं त्रिविधं शरीरेन्द्रियविषयनामकम् । शरीरेन्द्रियविषयभेदात् इति यावत् ॥

तत्र शरीरविषये मतान्तरं निरस्यति—

**१७४. प्रत्यक्षाप्रत्यक्षाणां संयोगस्याप्रत्यक्षत्वात् पञ्चात्मकं न विद्यते ॥ २ ॥**

शरीरं पृथिव्या जलेन तेजसा वायुना वा एकेनैव भूतेन आरब्धमिति सिद्धान्तः । तत्र ये "पञ्चभिर्भूतैरारब्धम् । अतएव पञ्चात्मकम्," इति वदन्ति, तेषां निरसनमिह क्रियते । तत्र वाय्वाकाशौ इतरैः त्रिभिः संयुक्तौ शरीरमारभेते इति तावन्न युक्तम् । अप्रत्यक्षौ हि तौ । इतराणि त्रीणि प्रत्यक्षाणि । प्रत्यक्षाप्रत्यक्षद्रव्यसंयोगो न प्रत्यक्षः । न हि घटाकाशसंयोगः प्रत्यक्षो भवति । तथा च वाय्वाकाशाभ्यां संयोगस्य पृथिव्यादिषु त्रिषु अप्रत्यक्षत्वात् पृथिव्यादिभिरारब्धे शरीरे वाय्वाकाशावपि तदारम्भकतया स्थिताविति कथं ज्ञायते ? वाय्वाकाशयोरप्रत्यक्षत्वात् साक्षात्-प्रत्यक्षेण तयोरारम्भकत्वं न ज्ञायते । तत्संयोगस्याप्यप्रत्यक्षत्वात् तद्द्वारेणाऽपि न ज्ञायते । अतः प्रमाणाभावात् तयोः शरीरारम्भकत्वं नास्ति इति न पञ्चात्मकं शरीरमिति भावः ॥

अन्यदपि मतं निरस्यति—

**१७५. गुणान्तराप्रादुर्भावाच्च न त्र्यात्मकम् ॥ ३ ॥**

अप्रत्यक्षौ वाय्वाकाशौ विहाय पृथिवीजलतेजोभिः प्रत्यक्षैः त्रिभिर्भूतैरारब्ध-मिदं शरीरम् । त्रीणीमानि प्रत्यक्षाण्येव । तथा तेषां संयोगोऽपि । तस्मात् त्र्यात्म-

कमिदम् । त्रिभिरारब्धमित्यर्थः । इदमपि मतं न सम्यक् कुतः । गुणान्तराप्रादुर्भावात् । यदि भूतत्रयपरमाणुभिः परस्परसंयुक्तैः शरीरात्मकं अवयविद्रव्यमुत्पाद्यते तर्हि ये तेषां व्यवस्थिता गुणाः ते तथैव शरीरवर्तिपार्थिवाद्यंशेषु नोपलभ्येरन् । उपलभ्यन्ते च । न तु विलक्षणं गुणान्तरं किमपि प्रादुर्भूतं दृश्यते । गन्धोऽनुष्णाशीतस्पर्शश्च पार्थिवांशे । शीतस्पर्शो जलांशे । उष्णस्पर्शः तेजोंऽशे । अवयविनि एकस्मिन् विरुद्धा इमे गुणा न खलु समवेयुः । न च गुणान्तरं एतेभ्यो व्यतिरिक्तं किमप्युपलभ्यते । अतो न त्र्यात्मकमिति ॥

यद्येवं एकभूतारब्धे शरीरे भूतान्तरोपलम्भः कथमित्यत्राह—

**१७६. अणुसंयोगस्त्वप्रतिषिद्धः ॥ ४ ॥**

शरीरारम्भकाणां एकभूतपरमाणूनां भूतान्तरपरमाणुभिः संयोगस्तु अप्रतिषिद्धः नास्माभिः प्रतिषिध्यते । नानुपपन्न इति भावः । पार्थिवशरीरारम्भकाः पृथिवीपरमाणवः जलपरमाणुभिः तेजःपरमाणुभिश्चः संयुक्ता वर्तन्ते । ते यदा शरीरमारभन्ते तदा जलपरमाणवः जलात्मकमवयविनं तेजःपरमाणवः तेजोमयमवयविनं च आरभन्ते । अनयोरवयविनोः पार्थिवशरीरात्मकेनावयविना संयोगो भवति । तेन हेतुना तत्र जलतेजोरूपभूतान्तरोपलब्धिः । एवं जलतेजोमयशरीरयोरपि द्रष्टव्यम् । एवं भूतान्तरोपलम्भस्योपपन्नत्वात् एकभूतपरमाण्वारब्धे शरीरे भूतान्तरपरमाणूनां नारम्भकत्वमिति सर्वशरीरं एकभूतात्मकमेव ॥

एवं शरीरस्वरूपं निरूप्य तद् विभजते—

**१७७. तत्र शरीरं द्विविधं योनिजमयोनिजं च ॥ ५ ॥**

योनिजं गर्भे स्थित्वा उत्पन्नम् । अन्यदयोनिजम् । योनिजं प्रत्यक्षसिद्धं निर्विवादम् । अयोनिजे विप्रतिपत्तिः स्यात् । अतस्तत्साधयन् हेतूनाह—

**१७८. अनियतदिग्देशपूर्वकत्वात् ॥ ६ ॥**

एतदादीनां हेतूनां उत्तरत्र "सन्त्ययोनिजा" इत्यंत्रान्वयः । अयोनिजशरीर-

वन्तश्चेतनाः सन्तीति तस्य सूत्रस्यार्थः। नियतौ दिग्देशौ पूर्वौ कारणतया पूर्ववर्तिनौ यस्य तत् नियतदिग्देशपूर्वकम्। तत्त्वाभावात्। शरीरोत्पत्तेरिति शेषः। प्राचीप्रभृतयो दश दिशः। तत्र स्वर्गभूपाताललोकादयो देशाः। शरीरेऽपि उदरं वा कर्णौ वा मुखं वा ऊरुर्वा पादो वेति देशाः। एतेषु दिग्देशेषु अत्रैव शरीरमुत्पद्यते नान्यत्रेति नियमो नास्ति। अस्मिन् लोके शरीरगर्भात् शरीरमुत्पद्यत इति पश्यामः। इदं दर्शनं शरीरगर्भात् शरीरमुत्पद्यत इत्यत्र प्रमाणम्। न त्वन्यत्र नोत्पद्यत इत्यत्र। गोमयाद्वृश्चिकादिशरीरस्य, तण्डुलादिभ्यः क्रिमिशरीरस्य च उत्पत्तिदर्शनात्। न च मनुष्यशरीरमन्यत्र नोत्पद्यत इति नियमः। अस्माकमिदानीमदर्शनमात्रेण तथा नियमासिद्धेः। न च तत्रानुमानमागमो वा प्रमाणमस्ति॥

इत्थमयोनिजपुरुषशरीरसत्त्वे बाधकप्रमाणं नास्तीत्युक्तम्। अथ साधकप्रमाणान्याह—

**१७९. धर्मविशेषाच्च॥ ७॥**

सर्वफलसाधनं हि धर्मः। गर्भवासं विनैव शरीरपरिग्रहानुकूलो धर्मो यदि कस्यचित् भवति तस्य तथा तत्प्राप्तौ को विघातः। श्रूयन्ते च तथा शरीरभाजः सीताद्रौपदीसरोमुनिप्रभृतयः॥

**१८०. समाख्याभावाच्च॥ ८॥**

पद्मभवः, ऊरुद्भवा, हिरण्यगर्भाङ्गभूः इत्यादि समाख्यासत्त्वाच्च। अन्वर्था हि इमाः समाख्याः न साङ्केतिक्यः केवलम्॥

**१८१. संज्ञाया आदित्वात्॥ ९॥**

प्रलयावसाने तस्मिन् तस्मिन् पदार्थे उत्पन्ने अस्य इयं संज्ञा, अनेन शब्देन अयमर्थोऽभिधेयः, इति संज्ञा कैश्चित् कृता। तत्र यः प्रथमः पुरुष उत्पन्नः तस्य पुरुष इति संज्ञां, या प्रथमा स्त्री उत्पन्ना तस्याः स्त्रीति संज्ञां, तेन तस्यां यो जातः तस्य पुत्र इति संज्ञां च ये अकुर्वन् तेषां यानि शरीराणि तानि पुरुषादिसंज्ञायाः पुरुषादिसंज्ञापेक्षया आदित्वात् पूर्वभावित्वात् अयोनिजान्येव भवन्ति। उक्तविविधसंज्ञायाः

कारणत्वादिति वा ॥

**१८२. सन्त्ययोनिजाः ॥ १० ॥**

अयोनिजशरीरवन्तः विशिष्टाश्चेतनाः सन्तीत्येतत्सूत्रार्थ उक्तः । इत्थमयोनिजं शरीरं युक्त्या साधितम् । तत्रेयं चरमा युक्तिरिति केनचित्प्रकारेण व्यञ्जयितुमिच्छन् सूत्रकारः पूर्वसूत्रे चकारं न प्रायुङ्क्तेति विभाव्यम् ॥

**१८३. वेदलिङ्गाच्च ॥ ११ ॥**

"प्रजापतिः प्रजा असृजत" इत्याह श्रुतिः । तत्र सङ्कल्पादेव सृष्टिरभिप्रेता, न मिथुनीभावेन । सङ्कल्पजा च सृष्टिरयोनिजैव । वेदे स्थितात् वेदवाक्यरूपत्वाद्वा उक्तविधात् लिङ्गाच्च सन्त्ययोनिजा इत्यर्थः । यद्यपि वेदलिङ्गं न स्यात् तथापि सिद्ध्यत्येव अयोनिजं शरीरमिति ज्ञापनार्थं पूर्वं प्रतिज्ञां पूरयित्वा पश्चात् लिङ्गोक्तिः । शरीरं निरूपितम् । पञ्चेन्द्रियाणि प्रसिद्धानि । विषयाश्च भोग्यपदार्था निरूपिताः प्रसिद्धाश्च । अत एषां निरूपणं न क्रियते ।

इति वैशेषिकसूत्रवृत्तौ सुगमायां
चतुर्थाध्याये द्वितीयमाह्निकम् ॥

अनुवर्तमाना

## सिद्धान्तलक्षणजागदीशीतत्त्वालोकव्याख्या

### साध्यतावच्छेदकतदितरेति ।

यद्यपि साध्यतावच्छेदकावच्छिन्नत्वसाध्यतासमानाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयाभावनिवेशेन महानसीयवह्न्यभावमादायाव्याप्तिवारणसंभवस्तथापि वह्निघटोभयाभावस्य सत्तासाध्यकविशिष्टसत्त्वाभावस्य च वारणासंभवेनाव्याप्त्या तत् परित्यज्य गुरुभूतमप्युभयानवच्छिन्नत्वं तद्वारणायाह ।

### तथापि साध्यतावच्छेदकतदितरोभयेति

अथ किमुभयानवच्छिन्नत्वम् ? । एकावच्छिन्नत्वविशिष्टापरावच्छिन्नत्वाभावः । किं वा साध्यतावच्छेदकतदितरोभयनिष्ठावच्छेदकतानिरूपितत्वाभावः । किं वा साध्यतावच्छेदकतदितरोभयनिष्ठावच्छेदकतानिरूपितत्वद्वयाभावः । तत्र नाद्यः । प्रमेयवद्वान् वाच्यत्वादित्यत्र प्रमेयमात्रस्य साध्यतावच्छेदकत्वेन घटत्वादेरपि साध्यतावच्छेदकत्वम् । येन रूपेण साध्यतावच्छेदकता तदनवच्छिन्नप्रकारतावच्छेदकस्य तदितर पदेन विवक्षितत्वादिति वक्ष्यमाणरीत्या साध्यतावच्छेदकेतरत्वञ्चेति 'लक्षणघटकाभावीयघटत्वावच्छिन्नप्रतियोगितायां प्रमेयावच्छिन्नत्वविशिष्टतदितरावच्छिन्नत्वस्यैव सत्त्वेन तादृशप्रतियोगिताकलक्षणघटकाभावस्याप्रसिद्ध्याऽव्याप्तेः । न चात्र प्रतियोगितावच्छेदकावच्छिन्नत्वविशिष्टसाध्यतावच्छेदकेतरावच्छिन्नत्वाभावप्रतियोगितावच्छेदकत्वस्य प्रमेयेतरावच्छिन्नत्वे एव कल्पनीयतया साध्यतावच्छेदकावच्छिन्नत्वविशिष्ट साध्यतावच्छेदकेतरावच्छिन्नत्वस्य एकविशिष्टापरत्वस्य गुरुत्वेन प्रतियोगितानवच्छेदकत्वमिति तदवच्छिन्नाभावस्याप्रसिद्धेः । साध्यतावच्छेदकतासमानाधिकरणाधेयत्वसंबन्धावच्छिन्नावच्छेदकता (साध्यतावच्छेदकनिष्ठविशिष्टाभावीयप्रतियोगितावच्छेदकता) निरूपितावच्छेदकता (साध्यतावच्छेदकत्व) निष्ठावच्छेदकतानिरूपितसामानाधिकरण्यसंबन्धावच्छिन्नावच्छेदकता ( साध्यतावच्छेदकावच्छिन्नत्वनिष्ठावच्छेदकता ) निरूपिता-

सती, साध्यतावच्छेदकेतरत्वसमानाधिरणावच्छेकता ( साध्यतावच्छेदकेतरनिष्ठावच्छेदकता ) निरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितनिरूपितत्वनिष्ठावच्छेदकताकप्रतियोगिता (अवच्छिन्नत्वनिष्ठप्रतियोगिता) काभावत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वावच्छिन्नत्ववत्त्वमेव लक्षणघटकाभावीयप्रतियोगितायां निवेशनीयम्। तत्र विशिष्टाभावो हि घटत्वावच्छिन्नत्वविशिष्टघटत्वावच्छिन्नत्वाभावो न भवितुमर्हति । गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेनाप्रसिद्धेः । (घटत्वावच्छिन्नत्वापेक्षया घटत्वावच्छिन्नत्वविशिष्टघटत्वावच्छिन्नत्वस्य गुरुधर्मत्वात्) । किन्तु घटत्वावच्छिन्नत्वविशिष्टपटत्वावच्छिन्नत्वाभाव एव भविष्यति । स च लक्षणघटकघटाद्यभावप्रतियोगितायां वर्तत एवेति तादृशप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदके प्रमेये सत्त्वेन प्रमेयवद्वान् वाच्यत्वादित्यत्र नाव्याप्तिरिति वाच्यम्। गुरुधर्मस्य प्रतियोगितावच्छेदकत्वपक्षे गत्यभावात्। प्रमेयवद्वान् वाच्यत्वादित्यत्र लक्षणघटकघटाभावप्रतियोगितायां साध्यतावच्छेदकघटत्वरूपसाध्यतावच्छेदकप्रमेयनिष्ठावच्छेदकतासमानाधिकरणाद्यत्वसंबन्धावच्छिन्नावच्छेदकतानिरूपितघटत्वरूपप्रमेयनिष्ठावच्छेदकतानिष्ठावच्छेदकतानिरूपितसामानाधिकरण्यसंबन्धावच्छिन्नघटत्वरूपप्रमेयावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपिता सती साध्यतावच्छेदकेतरत्वसमानाधिकरणघटत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतानिष्ठा ( घटत्वनिष्ठावच्छेदकत्वनिष्ठा ) वच्छेदकतानिरूपितनिरूपितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिकूटत्वावच्छिन्नवत्त्वस्य लक्षणघटकाभावीयप्रतियोगितायामभावेन लक्षणघटकतादृशप्रतियोगिताकाभावस्याप्रसिद्धया प्रमेयवद्वान् वाच्यत्वादित्यत्राव्याप्तेः। घटाभावप्रतियोगितायां घटत्वावच्छिन्नत्वविशिष्टघटत्वावच्छिन्नत्वस्य सत्वेन तदभावस्य तत्रासत्त्वात्।

यत्तु प्रकारत्वविशेष्यत्वप्रतियोगित्वादिनिष्ठत्वेन अवच्छिन्नत्वस्य बहुत्वेन एकस्यावच्छिन्नत्वसत्वस्याभावेन प्रतियोगितानिष्ठस्यैवावच्छिन्नत्वस्य हेतुसामानाधिकरणाभावप्रतियोगिताविशेषणीभूताभावप्रतियोगितया प्रवेशः। अन्यथा महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यत्राव्याप्त्यापत्तेः । महानसीयत्ववह्नित्वावच्छिन्नत्वस्य प्रकारतानिष्ठस्य लक्षणघटकमहानसीयवह्न्यभावप्रतियोगितायाम् असत्त्वेन तदभावस्य लक्षणघटकत्वापत्तेः । तथा च प्रमेयवद्वान् वाच्यत्वादित्यत्राव्याप्तिः । लक्षणघटक

प्रमेयघटाभावीयप्रतियोगितावच्छेदकत्वस्य लाघवेन घटत्वमात्रे कल्पनीयतया प्रतियोगिता-निष्ठस्य प्रमेयत्वावच्छिन्नत्वविशिष्टघटत्वावच्छिन्नत्वस्याप्रसिद्धया तादृशप्रतियोगितायां तदभावाप्रसिद्धेरिति । तन्न, साध्यतावच्छेदकनिष्ठावच्छेदकतायां साध्यतावच्छेदकता-घटकसंबन्धावच्छिन्नत्वस्यानिवेशनीयतया विषयितया प्रमेयत्ववज्ज्ञानाभावप्रतियोगि-तायां साध्यतावच्छेदकत्वविशिष्टतदितरज्ञानत्वावच्छिन्नत्वस्य प्रतियोगितया तदभावस्य लक्षणघटकघटाभावीयप्रतियोगितायां सत्त्वेन प्रमेयवद्वान् वाच्यत्वादित्यत्राव्याप्तिविरहात्

न द्वितीयः । (न साध्यतावच्छेदकतदितरोभयनिष्ठावच्छेदकतानिरूपितत्वाभावः) जातिमद्वान् ज्ञानत्वादित्यत्रातिव्याप्तेः । लक्षणघटकसाध्याभावीयप्रतियोगितायां साध्य-तावच्छेदकयत्किञ्चिज्जाति, येन रूपेण साध्यतावच्छेदकं तदनवच्छिन्नप्रकारतावच्छेद-करूपतदितरेति वक्ष्यमाणरीत्या तदितरत्ववज्जात्यन्तरोभयनिष्ठावच्छेदकतानिरूपितत्व-स्यैव सत्त्वेन तदनिरूपितत्वस्यासत्त्वात् । साध्याभावस्य लक्षणाघटकत्वेनाभावान्तरस्यैव लक्षणघटकत्वमिति तदीयप्रतियोगितानवच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वात् ।

न तृतीयः । (न साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्व, तदितरनिष्ठावच्छे-दकतानिरूपितत्वद्वयाभावः।) बह्निमान् धूमादित्यत्र महानसीयबह्न्यभावमादायाव्याप्तेः प्रतियोगिनिष्ठनानाविशेष्यतानिरूपितावच्छेदकनिष्ठप्रकारतास्थले एवावच्छेदकताभेदस्य शक्तिवादादौ उक्तत्वेन महानसीयवह्न्यभावप्रतियोगितायां साध्यतावच्छेदकबह्नित्व-निष्ठावच्छेदकतानिरूपितत्व, तदितरमहानसीयत्वनिष्ठावच्छेदकतानिरूपितत्वद्वयासत्त्वेन-महानसीयवह्न्यभावस्य लक्षणघटकत्वापत्तेः । बह्निनिष्ठनानाविशेष्यताया अभावेन न बह्नित्वमहानसीयत्वोभयनिष्ठप्रतियोगितावच्छेकताभेदः । किन्तु तादृशप्रतियोगितावच्छे-दकतात्वेनैक्यमिति चेदुच्यते ।

महानसीयवह्न्यभावप्रतियोगितावच्छेदकतायां सावच्छिन्नत्वनिरवच्छिन्नत्वविरु-द्धधर्माध्यासेन महानसीयत्वे वह्नित्वे चावच्छेदकताभेदस्यैव प्रामाणिकतया साध्यतावच्छे-दकनिष्ठावच्छेदकतानिरूपितत्व, तदितरावच्छेदकतानिरूपितत्वद्वयाभावरूपे तृतीय-कल्पे अदोषात् । महानसीयबह्न्यभावीयप्रतियोगितायां तादृशनिरूपितत्वद्वयसत्त्वेन तद-भावस्य लक्षणाघटकत्वात् ।

केचित्तु सावच्छिन्नत्वनिरवच्छिन्नत्वोभयविरुद्धधर्माध्यासेन महानसीयवह्न्यभावप्रतियोगितावच्छेदकता महानसीयत्वनिष्ठा वह्नित्वनिष्ठा च नैका, किन्तु भिन्नैव । प्रतियोगिनिष्ठनानाविशेष्यतानिरूपितप्रकारतास्थले एवावच्छेदकताभेदः न तु एकविशेष्यतानिरूपितप्रकारतास्थलेऽवच्छेदकताभेदः । एवञ्च महानसीयवह्न्यभावप्रतियोगितावच्छेदकता महानसीयत्ववह्नित्वोभयनिष्ठैकैव न तु नानावच्छेदकता । महानसीयवह्निनिष्ठैकैव विशेष्यता तन्निरूपितावच्छेदकतोभयनिष्ठैकैव न तु नानावच्छेदकता । सावच्छिन्नत्वनिरवच्छिन्नत्वोभयविरुद्धधर्माध्यासेन महानसीयत्वे वह्नित्वे च नैकाऽवच्छेदकता किन्तु विभिन्नैवेत्युभयमतसाधारण्यानुरोधेन साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वविशिष्टतदितरनिष्ठावच्छेदकतानिरूपितत्वाभावो लक्षणघटकाभावप्रतियोगितायां निवेश्यः । वैं० ; स्वसाजात्य, स्वसामानाधिकरण्योभयसंबन्धेन । एवञ्च वह्निमान् धूमादित्यत्र महानसीयवह्न्यभावो न लक्षणघटकः । तदीयप्रतियोगितायां तादृशोभयसंबन्धेन वह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वविशिष्टतदितरमहानसीयत्वनिष्ठावच्छेदकतानिरूपितत्वस्यैव सत्त्वेन तदभावासत्त्वात् । भवति च घटाभावो लक्षणघटकः । तदीयप्रतियोगितायां साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वविरहेण तादृशविशिष्टाभावस्य तत्र सत्वात् । प्रमेयवद्वान् वाच्यत्वादित्यत्र नाव्याप्तिः । लक्षणघटकघटाभावप्रतियोगितायां साध्यतावच्छेदकप्रमेयनिष्ठसावच्छिन्नावच्छेदकताविशिष्टावच्छेदकतानिरूपित्वविरहेण साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वविशिष्ट तदितरनिष्ठावच्छेदकतानिरूपितत्वाभावस्य तत्र सत्त्वात् ।

न च वह्नित्ववद्वान् धूमादित्यत्र महानसीयवह्न्यभावमादायाव्याप्तिः । तदीयप्रतियोगितानिरूपितसावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतायां साध्यतावच्छेदक वह्नित्वनिष्ठसावच्छिन्नावच्छेदकतासामानाधिकरण्यस्य विरहेण साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वविशिष्टतदितरनिष्ठावच्छेदकतानिरूपितत्वाभावस्य तदीयप्रतियोगितायां सत्त्वादिति वाच्यम् । साध्यतावच्छेदकतायां प्रतियोगितावच्छेदकताविशिष्टान्यत्वस्य विवक्षणेनादोषात् । वैं०; स्वसाजात्य स्वसामानाधिकरण्योभयसंबन्धेन । एवञ्च प्रतियोगितावच्छेदकताविशिष्टान्यसाध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वविशिष्टतदितरनिष्ठावच्छेदकतानिरूपितत्वा-

भाववती या लक्षणघटकाभावीया प्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति फलितम् । वैशिष्टयञ्चोभयत्र स्वसामानाधिकरण्य स्वसाजात्योभयसंवन्धेन । तथा च वह्नित्ववद्वान् धूमादित्यत्र महानसीयवह्न्यभावमादाय नाव्याप्तिः । महानसीयत्व वह्नित्वोभयत्रैका प्रतियोगितावच्छेदकतेति पक्षे साध्यतावच्छेदकवह्नित्वनिष्ठसावच्छिन्नावच्छेदकतायां प्रतियोगितावच्छेदकमहानसीयत्वनिष्ठसावच्छिन्नावच्छेदकतासाजात्यस्य स्वसामानाधिकरण्यस्य चोभयस्य सत्त्वेन प्रतियोगितावच्छेदकताविशिष्टैव साध्यतावच्छेदकता न तु तदन्या । एवं महानसीयत्व, वह्नित्वोभयनिष्ठा भिन्नैवावच्छेदकता नत्वेकेति पक्षेऽपि महानसीयवह्न्यभावमादाय न तत्राव्याप्तिः । प्रतियोगितावच्छेदकमहानसीयत्वनिष्ठसावच्छिन्नावच्छेदकतासाजात्यस्य वह्नित्वनिष्ठसावच्छिन्नसाध्यतावच्छेदकतायां सत्वेऽपि स्वसामानाधिकरण्यस्य विरहेण साध्यतावच्छेदकता न प्रतियोगितावच्छेदकताविशिष्टा किन्तु तदन्येति महानसीयवह्न्यभावो न लक्षणघटक इति नोक्ताव्याप्तिः । अत एव (स्वसाजात्य स्वसामानाधिकरण्योभयसंवन्धेन साध्यतावच्छेदकतायां प्रतियोगितावच्छेदकताविशिष्टान्यत्वनिवेशादेव ) जातिमत्त्वान् घटत्वादित्यत्र हेत्वधिकरणे घटे पटसमवेतत्वविशिष्टजातिमदभावमादायाव्याप्तिवारणाय प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नत्वस्य वक्ष्यमाणस्य साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नत्वार्थकताया आवश्यकताया घटत्ववदभावस्य लक्षणाघटकत्वम् । साध्यतावच्छेदकतावच्छेदकेतरघटत्वत्वावच्छिन्नावच्छेदकतानिरूपितत्वस्य हेतुसमानाधिकरण घटत्ववदभावप्रतियोगितायां सत्त्वेन साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नत्वस्य तत्रासत्वात् । साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नावच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावस्यैव सावच्छिन्नावच्छेदकतास्थले लक्षणघटकत्वात् । घटाभावीयप्रतियोगितानिरूपितसावच्छिन्नावच्छेदकत्वाप्रसिद्धेः । सोऽभावो न लक्षणघटकः । सावच्छिन्नावच्छेदकताकसाध्यस्थले सावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावस्यैव लक्षणघटकत्वात् । प्रमेयवत्साध्यकाव्याप्त्या प्रतियोगितानिरूपितावच्छेदकतायां महानसीयवह्न्यभावमादायाव्याप्तिं वारयितुं सावच्छिन्नत्वनिवेशस्य कर्तुमशक्यत्वेऽपि न क्षतिरिति वदन्ति । (न च वह्नि-

मान् धूमादित्यत्र महानसीयवह्न्यभावमादायाव्याप्तिवारणाय सावच्छिन्नावच्छेदकत्वा-निरूपितत्वं लक्षणघटकाभावीयप्रतियोगितायां निवेश्यम् । तथा च महानसीय-वह्न्यभावो न लक्षणघटकस्तदीयप्रतियोगितायां महानसीयत्वनिष्ठसावच्छिन्नावच्छेदकता-निरूपितत्वस्यैव सत्त्वादिति लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदक-तदितरोभयानवच्छिन्नत्वं न निवेश्यमिति वाच्यम् । एवं सति प्रमेयवद्वान् वाच्यत्वा-दित्यत्राव्याप्तेः । प्रतियोगितामात्रे प्रमेयावच्छिन्नत्वस्य सत्त्वेन तन्निष्ठावच्छे-दकतायाः प्रमेयत्वावच्छिन्नत्वेन सावच्छिन्नत्वात् । हेतुसमानाधिकरणघटाभावप्रतियो-गितायां सावच्छिन्नावच्छेदकता (प्रमेयत्वावच्छिन्नप्रमेयनिष्ठसावच्छिन्नावच्छेदकता) निरूपितत्वस्य सत्त्वेन तदनिरूपितत्वस्यासत्त्वाद् घटाद्यभावो न लक्षणघटक इति तादृशप्रतियोगितानिरूपकाभावस्याप्रसिद्धेः । अतो लक्षणघटकाभावीयप्रतियोगितायां सावच्छिन्नावच्छेदकत्वानिरूपितत्वं निवेश्यम् । किन्तु वह्निमान् धूमादित्यत्रमहानसीय-वह्न्यभावमादायाव्याप्तिवारणायोभयसाधारण्याय साध्यतावच्छेदकताविशिष्टा वच्छेदकतानिरूपितत्वविशिष्टसाध्यतावच्छेदकेतरनिष्ठावच्छेदकतानिरूपितत्वाभावो लक्षणघटकाभावप्रतियोगितायां निवेश्य इति वदन्ति) ।

ननु लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्न-त्वस्य निवेशेन महानसीयवह्न्यभावं वह्निघटोभयाभावञ्चादाय वह्निमान् धूमादित्यत्रा व्याप्तिवारणेऽपि साध्यतावच्छेदकेतरस्याप्रसिद्धया प्रमेयवद्वान् वाच्यत्वादित्यत्रा-व्याप्तिस्तदवस्था । तद्वारणाय साध्यतावच्छेदकेतरत्वं साध्यतावच्छेदकवृत्तिभेदप्रतियो-गित्वरूपं वाच्यम् । एवञ्च पटत्वरूपप्रमेये साध्यतावच्छेदके पटत्वं न घटत्वमिति भेदस्य सत्वेन भवति घटत्वं साध्यतावच्छेदकेतरदिति साध्यतावच्छेदकप्रमेय, तदितरघटत्वो-भयानवच्छिन्नत्वं लक्षणघटकघटाभावीयप्रतियोगितायां वर्तते तदनवच्छेदकत्वस्य साध्यता-वच्छेदके प्रमेये सत्वान्नाव्याप्तिरिति चेन्न । महानसीयवह्निभिन्नवह्निमान् धूमादित्यत्राति-व्याप्त्यापतेः । एकस्य साध्यतावच्छेदकस्य अपरसाध्यतावच्छेदकवृत्तिभेदप्रतियोगित्वेन तदि-तरत्वमिति साध्याभावीयप्रतियोगितायां साध्यतावच्छेदकतदितरोभयावच्छिन्नत्वस्य सत्त्वेन साध्याभावो न लक्षणघटक इत्यभावान्तरप्रतियोगितानवच्छेदकत्वस्य साध्यताव-

वच्छेदके सत्त्वात् । महानसीयत्वं न वह्नित्वम् किं वा वह्नित्वं न महानसीयत्वमिति भेदः परस्परसाध्यतावच्छेदके वर्तते, अत इतरपदस्यान्तरार्थकत्वमभ्युपेत्याह ।

**स्वानवच्छिन्नप्रकारतावच्छेदकस्य वा तदितरपदेन विवक्षितत्वादिति ।**

यद्यपि स्वानवच्छिन्नप्रकारताश्रयस्य तदितरत्वविवक्षणे वह्निमान् धूमादित्यत्र वह्निविशिष्टवह्न्यभावमादाय नाव्याप्तिः । वह्निविशिष्टवह्न्यभावप्रतियोगितायां वह्नित्वानवच्छिन्ना या द्रव्यत्वावच्छिन्ना वह्निनिष्ठा प्रकारता तदाश्रयवह्न्यवच्छिन्नत्वस्य साध्यतावच्छेदकवह्नित्वावच्छिन्नत्वस्य चोभयस्यैव सत्त्वात्, तत्प्रतियोगितानिरूपकाभावस्य लक्षणाघटकत्वमिति । तथापि महानसीयवह्निमान् धूमादित्यत्रातिव्याप्तिः । साध्याभावीयप्रतियोगितायां वह्नित्वानवच्छिन्नप्रकारताश्रयमहानसीयत्वावच्छिन्नत्वस्य साध्यतावच्छेदकवह्नित्वस्य चोभयस्य सत्त्वेन साध्याभावो न लक्षणघटक इत्यन्याभावप्रतियोगितानवच्छदेकत्वस्य साध्यतावच्छेदके सत्त्वात् । स्वानवच्छिन्नप्रकारतावच्छेदकस्य साध्यतावच्छेदकेतरत्वेन विवक्षणे तु नोक्तदोषः । साध्यतावच्छदेकानवच्छिन्ना प्रकारता न वह्निनिष्ठा न वा महानसीयनिष्ठा किन्तु घटादिनिष्ठैव तदवच्छदेकघटत्व साध्यतावच्छेदकोभयानवच्छिन्नत्वयोः साध्याभावीयप्रतियोगितायां सत्त्वेन तन्निरूपकसाध्याभावस्य लक्षणघटकत्वात् ।

प्रकारतायां साध्यतावच्छेदकानवच्छिन्नत्वञ्च साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितत्वम् । वै० स्वसामानाधिकरण्य स्वानवच्छेदकानवच्छिन्नत्वोभय संबन्धेन । तेन प्रमेयवद्वान् वाच्यत्वादित्यत्र नाव्याप्तिः । अन्यथा प्रमेयवद्वान् वाच्यत्वादित्यत्र साध्यतावच्छेदकतदितरोभयानवच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्ध्याऽव्याप्त्यापत्तेः । साध्यतावच्छेदकेतरत्वञ्च स्वानवच्छिन्नप्रकारतावच्छेदकत्वम् । तच्च घटत्वादौ वर्तते । साध्यतावच्छेदकप्रमेयानवच्छिन्नघटनिष्ठप्रकारतावच्छेदकत्वस्य घटत्वे सत्वात् । एवञ्च साध्यतावच्छेदकप्रमेयतदितरघटत्वादिधर्मावच्छिन्नत्वोभयस्य लक्षणाघटकाभावीय प्रतियोगितायां सत्त्वेन लक्षणघटकाभावस्यैवाप्रसिद्धेः । घटत्वस्यात्र प्रमेयेतरत्वम् स्वानवच्छिन्नप्रकारतावच्छेदकत्वेन बोध्यम् । स्वानवच्छिन्नत्वस्य साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितत्वरूपत्वे तु नोक्तदोषः । स्वसामानाधिकरण्य, स्वानच्छेदकानवच्छिन्नत्वाभ्यां साध्यतावच्छेदकताविशिष्टाऽवच्छेदकता प्रमेयनिष्ठैव

तदनिरूपितत्वस्य घटनिष्ठप्रकारतायां सत्त्वेन तदवच्छेदकघटत्वस्य प्रमेयेतरत्वमिति तदुभयानवच्छिन्नत्वस्य लक्षणघटकघटाभावीयप्रतियोगितायां प्रसिद्धेः। वैशिष्टयघटक स्वसामानाधिकरण्यस्योपादानेन गुणवान् वायुत्वादित्यत्र नाव्याप्तिः। अन्यथा हेत्वधिकरणे वायौ कालिकेन गुणत्वविशिष्टं रूपं नास्तीत्यभावीया गुणत्वरूपत्वनिष्ठनिरवच्छिन्नावच्छेदकताद्वयनिरूपिता प्रतियोगिता तदवच्छेदकत्वस्यैव साध्यतावच्छेदके गुणत्वे सत्त्वेनाव्याप्त्यापत्तेः। प्रतियोगिता निरवच्छिन्ना रूपत्वनिष्ठनिरवच्छिन्नप्रतियोगितावच्छेदकतायां स्वानवच्छेदकानवच्छिन्नत्वस्य सत्त्वेन गुणत्वनिष्ठसाध्यतावच्छेदकताविशिष्टत्वेऽपि गुणत्वनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्यासत्त्वेन तादृशोभयसंबन्धेन गुणत्वनिष्ठ साध्यतावच्छेदताविशिष्टत्वाभावेन तादृशोभयसंबन्धेन स्वविशिष्टत्वाभावस्य (साध्यतावच्छेदकगुणत्वनिष्ठावच्छेदकताविशिष्टत्वाभावस्य) रूपत्वनिष्ठावच्छेदकतायां सत्त्वात्। तादृशगुणत्वनिष्ठावच्छेदकत्वानिरूपितरूपनिष्ठप्रकारतावच्छेदकरूपत्वावच्छिन्नत्वस्यैव तादृशाभावीयप्रतियोगितायां सत्त्वेन तदुभयाभावस्यासत्त्वमिति तदभावस्य लक्षणाघटकत्वं स्वसामानाधिकरण्यस्योपादानेन भवति।

यत्तु साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारतावच्छेदकं तदितरपदग्राह्यम्। वै० स्वसाजात्य स्वसामानाधिकरण्योभयसंबन्धेन। तन्न, समवायेन वह्निविशिष्टस्य संयोगेन साध्यतायां धूमे सद्धेतौ समवायेन वह्निविशिष्टमहानसीयविशिष्टाभावस्य हेत्वधिकरणे पर्वते सत्त्वेन तदीयप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वमिति तत्राव्याप्तेः। साध्यतावछेदकवह्निविशिष्टत्वनिष्ठावच्छेदकताविशिष्टावच्छेदकता सावच्छिन्नत्वेन सजातीया महानसीयविशिष्टत्वनिष्ठा स्वसमानाधिकरणा च तदनिरूपिता प्रकारता घटादिनिष्ठा तदवच्छेदकघटत्वादिनिष्ठावच्छेदकत्वानिरूपितत्वस्य तदभावीयप्रतियोगितायां सत्त्वेन तदभावस्य लक्षणघटकत्वात्। स्वानवच्छिन्नप्रकारतेत्यादेः मदुक्तसंबन्धाभ्यां साध्यतावछेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारतेत्यर्थकरणे तु नोक्तदोषः। साध्यतावच्छेदकताविशिष्टावच्छेदकता स्वसामानाधिकरण्य, स्वानवच्छेदकानवच्छिन्नत्वोभयसंबन्धेन वह्निविशिष्टत्वनिष्ठसाध्यतावच्छेदकतैव तदनिरूपितप्रकारता महानसीयविशिष्टनिष्ठा तदवच्छेदकस्य महानसीयविशिष्टत्वस्य साध्यतावच्छेदकेतरत्वमिति साध्यतावच्छेदकवह्निविशिष्टत्वतदितर-

महानसीयविशिष्टत्वोभयावच्छिन्नत्वस्यैव तदीयप्रतियोगितायां सत्त्वेन तदभावस्य लक्षणाघटकत्वात् ।

नन्वेवमपि अवच्छेदकभेदेनावच्छेदकताया भेद इति नोक्तदोषः । वह्नि-विशिष्टत्वमहानसीयविशिष्टत्वनिष्ठावच्छेदकतयोरुभयोः सामानाधिकरण्याभावेन स्व-विशिष्टत्वाभावान्न तदभावो लक्षणघटक इति जातिमद्वान् भावत्वादित्यत्र लक्षणघटका-भावीयप्रतियोगितायां साध्यतावच्छेदकजातितदितरघटत्वादिरूपजात्युभयावच्छिन्नत्वस्य सत्त्वेन साध्याभावो न लक्षणघटकः । किन्तु घटवान् नास्तीत्यभाव एव लक्षणघटक-स्तदीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके जातौ सत्त्वेनातिव्याप्तिः । येन रूपेण साध्यतावच्छेदकता तदनवच्छिन्नप्रकारतावच्छेदकत्वस्य घटत्वादिजातौ सत्त्वेन तस्याः साध्यतावच्छेदकेतरत्वादिति चेन्न । लक्षणघटकाभावीयप्रतियोगितायां साध्यता वच्छेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारतावच्छेदकताविशिष्टावच्छेदकतानिरूपि - तत्वरूपं साध्यतावच्छेदकानवच्छिन्नप्रकारतावच्छेदकावच्छिन्नत्वमिति कथनेनादोषात् । प्रकारतावच्छेदकतो वै० अवच्छेदकतायाम् , स्वसामानाधिकरण्य, स्वानवच्छेदकान-वच्छिन्नत्वोभयसंबन्धेन । तथा च साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपित प्रकारतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्व साध्यतावच्छेदकावच्छिन्नत्वोभया-भाववती या लक्षणघटकाभावप्रतियोगिता तन्निरूपितावच्छेदकत्वाभाववत्साध्यता वच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम् । उभयत्र वै० स्व सामानाधिकरण्य स्वानवच्छेदकानवच्छिन्नत्वोभयसंबन्धेन । तथा चावच्छेदकभेदेना वच्छेदकताभेद इति पक्षे जातिमद्वान् भावत्वादित्यत्र हेतुसमानाधिकरणसाध्याभावीय प्रतियोगितायां साध्यतावच्छेदकजात्यवच्छिन्नत्व साध्यतावच्छेदकताविशिष्टावच्छेद-कत्वानिरूपिता घटवानितिज्ञानीया घटनिष्ठा तदवच्छेदकघटत्वनिष्ठावच्छेदकता विशिष्टावच्छेदकतानिरूपितत्वोभयाभावस्य सत्त्वेन साध्याभावस्य लक्षणघटकत्वमिति तत्र नातिव्याप्तिः । एवमवच्छेदकभेदेन नावच्छेदकताभेद इति पक्षेऽपि जातिमद्-वान् भावत्वादित्यत्र नातिव्याप्तिः । साध्याभावीयप्रतियोगितायां साध्यतावच्छेदका वच्छिन्नत्व, साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारतावच्छेदकता

विशिष्टावच्छेदकतानिरूपितत्वोभयाभावस्य सत्त्वेन साध्याभावस्य लक्षणघटकत्वात् । वै० स्वसामानाधिकरण्य, स्वानवच्छेदकानवच्छिन्नत्वोभयसंबन्धेन । जातिनिष्ठघटत्वनिष्ठावच्छेदकतयोः स्वानवच्छेदकानवच्छिन्नत्वस्य सत्वात् । एवं समवायेन वह्निविशिष्टवान् धूमादित्यत्र बह्निविशिष्टमहानसीयविशिष्टाभावमादाय नाव्याप्तिः । तदीय प्रयियोगितायां साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारता महानसीयविशिष्टनिष्ठा तदवच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वस्य, साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वस्य च सत्त्वेन तदभावस्य लक्षणाघटकत्वात् । न चावच्छेदकभेदेनावच्छेदकताया भेदाभाव इति पक्षे महानसीयवह्निमान् धूमादित्यत्र हेतुसमानाधिकरण साध्याभावीयप्रतियोगितायां साध्यतावच्छेदकताविशिष्टावच्छेदकता महानसीयत्वनिष्ठा सावच्छिन्ना, बह्नित्वनिष्ठा च निरवच्छिन्ना तदनिरूपिता प्रकारता वह्नित्वविशिष्टवानितिज्ञानीया बह्नित्वविशिष्टनिष्ठा तन्निरूपितबह्नित्वनिष्ठसावच्छिन्नावच्छेदकतायां महानसीयत्वनिष्ठावच्छेदकतासामानाधिकरण्यस्य विरहेण बह्नित्वनिष्ठनिरवच्छिन्नसाध्यतावच्छेदकतानवच्छेदकबह्नित्वत्वानवच्छिन्नत्वस्य विरहेण च साध्यतावच्छेदकतावैशिष्टयस्य विरहात् तादृशप्रकारतानिरूपितबह्नित्वनिष्ठसावच्छिन्नावच्छेदकताविशिष्टनिरवच्छिन्ना बह्नित्वनिष्ठा अवच्छेदकता तन्निरूपितत्वस्य महानसीयबह्न्यभावीयप्रतियोगितायां सत्वेन तादृशोभयाभावस्यासत्वात् साध्याभावस्य लक्षणाघटकत्वेनाभावान्तरमादायातिव्याप्तिरिति वाच्यम् । साध्यतावच्छेदकता विशिष्टावच्छेदकत्वानिरूपितप्रकारतावच्छेदकतावैशिष्टयस्य स्वसामानाधिकरण्य, स्वानवच्छेदकानवच्छिन्नत्व, स्ववृत्तित्वैतत्त्रितयसंबन्धेनावच्छेदकतायां विवक्षणेनादोषात् । वृत्तित्वञ्च स्वानवच्छेदकानवच्छिन्नत्वसंबन्धेन । बह्नित्वनिष्ठसावच्छिन्नप्रकारतावच्छेदकतायां वह्नित्वनिष्ठनिरवच्छिन्नप्रकारतावच्छेदकताया वृत्तित्वविरहेण तस्याः प्रकारतावच्छेदकतावच्छेदकताविशिष्टत्वाभावात्, निरवच्छिन्नप्रकारतानवच्छेदक बह्नित्वत्वावच्छिन्नत्वस्यैव प्रकारतायां सत्वात् । तथा च साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्व, साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वोभयाभाववती या लक्षणघटकाभावीया प्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलि-

तम् । अवच्छेदकतायां साध्यतावच्छेदकतावैशिष्ट्यञ्च स्वसामानाधिकरण्य, स्वानवच्छेदकानवच्छिन्नत्वोभयसंबन्धेन । अवच्छेदकतायां प्रकारतावच्छेदकतावैशिष्ट्यञ्च स्वसामानाधिकरण्य, स्वानवच्छेदकानवच्छिन्नत्व, स्ववृत्तित्वैतत् त्रितयसंबन्धेन । वृत्तित्वञ्च स्वानवच्छेदकानवच्छिन्नत्वसंबन्धेन । तादृशप्रकारतावच्छेदकताविशिष्टावच्छेदकतेत्यत्र वशिष्ट्यनियामकस्वसामानाधिकरण्यस्य निवेशात् महानसीयवह्निमान्-धूमादित्यत्र नातिव्याप्तिः । अन्यथा हेतुसमानाधिकरणसाध्याभावीयप्रतियोगिताय साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितघटनिष्ठप्रकारतावच्छेदकता वह्नित्व निष्ठनिरवच्छिन्नावच्छेदकतानिरूपितत्वस्य साध्यतावच्छेदकताविशिष्टावच्छेदकता-निरूपितत्वस्य च सत्त्वेन तादृशोभयाभावस्यासत्वात् साध्याभावस्य लक्षणा-घटकतया घटाद्यभाव एव लक्षणघटक इति तदीयप्रतियोगितानवच्छेदकत्वस्य-साध्यतावच्छेदके सत्त्वात् तत्रातिव्याप्त्यापत्तेः ।

अथ कालिकेन महानसीयत्वविशिष्टं सत् समवायेन वह्नित्वविशिष्टवान् (महानसीय वह्निमान्) धूमादित्यत्राव्याप्तिः । हेत्वधिकरणे पर्वते समवायेन महानसीयत्व-विशिष्टः सन् कालिकेन वह्नित्वविशिष्टो नास्तीति प्रतीतिसिद्धाभावीयप्रतियोगितायां साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्व, साध्यतावच्छेदकताविशिष्टावच्छेद-कत्वानिरूपितप्रकारतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वोभयाभावस्य सत्वेन-भवति साध्याभावो लक्षणघटक इति तदीयप्रतियोगितानवच्छेदकत्वस्य साध्यता वच्छेदकेऽसत्वात् । एवं गुणत्ववद्वान् द्रव्यत्वादित्यत्राव्याप्तिः । हेत्वधिकरणे जलीय-परमाणौ कालिकेन गुणत्वविशिष्टं सत् समवायेन गुणत्वविशिष्टं नास्तीति प्रतीति-सिद्धाभावस्य सत्वेन तदीयप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वात् । नित्येषु कालिकायोगात् । नवोक्ताभावयोः प्रतियोगिव्यधिकरणत्वासंभव इति वाच्यम् । एवं सति समवायेन महानसीयत्ववत् समवायेन वह्नित्ववद्वान् धूमादित्यत्र साध्याभावस्य पूर्वोक्तरीत्या परिष्क्रियमाणप्रतियोगिवैयधिकरण्याभावेन लक्षणाघटकत्वात् । अभावा-न्तरमादायातिव्याप्त्यापत्तेः । वह्नित्वस्य स्वरूपत एव साध्यतावच्छेदकत्वेन "येन रूपेण साध्यतावच्छेकता तदनवच्छिन्नप्रकारतावच्छेदकत्वस्य वह्नित्वविशिष्टवह्नित्वे सत्त्वेन वह्नित्वत्वविशिष्टस्य वह्नित्वस्य तदितरत्वमिति साध्यतावच्छेदकवह्नित्वाव च्छिन्नत्व, तादृशप्रकारतावच्छेदक वह्नित्वावच्छिन्नत्वयोरुभयोः प्रतियोगिव्य-

धिकरणहेतुसमानाधिकरणसाध्याभावीयप्रतियोगितायां सत्त्वेन साध्याभावो न लक्षणघटक इत्यन्याभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति चेन्न । स्वानवच्छिन्नेत्यस्य साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितत्वमर्थः । तत्रावच्छेदकतायां साध्यतावच्छेदकतावैशिष्ट्यम् । स्वसामानाधिकरण्य स्वानवच्छेदकानवच्छिन्नत्वसंबन्धावच्छिन्नस्ववृत्तित्व, स्वान वच्छेदकानवच्छिन्नत्व, स्वावच्छेदकसंबन्धावच्छिन्नत्वैतत्प्रसिद्धचतुष्टयसंबन्धेनोक्तौ दोषाभावात् । समवायेन महानसीयत्वविशिष्टस्य कालिकेन वह्नित्वविशिष्टस्य वह्नेरभावीयप्रतियोगितावच्छेदकतायां स्वावच्छेदकसंबन्धावच्छिन्नत्वस्य विरहेण साध्यतावच्छेकताविशिष्टत्वाभावात् । कालिकेन महानसीयत्वविशिष्टः सन् समवायेन वह्नित्वविशिष्टो यत्र साध्यं तत्र समवायेन महानसीयत्वविशिष्टस्य कालिकेन वह्नित्वविशिष्टस्य वह्नेरभावमादाय नाव्याप्तिः । तदभावीयप्रतियोगितायां साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वस्य, तादृशचतुष्टसंबन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वस्य च सत्त्वेन तादृशोभयाभावस्यासत्त्वेन तदभावस्य लक्षणाघटकत्वात् । वह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायभिन्नकालिकसंबन्धावच्छिन्नत्वस्य, कालिकसंबन्धावच्छिन्नमहानसीयत्वनिष्ठसाध्यतावच्छेदकतानवच्छेदकसमवायसंबन्धावच्छिन्नत्वस्य च सत्त्वेन-तादृशोभयाभावस्यासत्त्वात्, तदभावस्य लक्षणाघटकत्वात् । वह्नित्वनिष्ठसाध्यातावच्छेदकतावच्छेदकसमवायभिन्नकालिकसंबन्धावच्छिन्नत्वस्य] कालिकसंबन्धावच्छिन्नमहानसीयत्वनिष्ठसाध्यतावच्छेदकतानवच्छेदकसमवायसंबन्धावच्छिन्नत्वस्य च प्रतियोगितावच्छेदकतायां सत्त्वात् । तन्निष्ठाप्रकारता तदनिरूपिता भवति ।

एवम् उक्तसाध्यकव्यभिचारिणि समवायेन महानसीयत्वविशिष्टः सन् कालिकेन वह्नित्वविशिष्टो यो वह्निस्तद्वान् धूमादित्यत्र साध्याभावप्रतियोगितायां तादृशोभयाभावसंपत्त्यर्थं प्रकारतावच्छेदकतावैशिष्ट्यमपि अवच्छेदकतायां पूर्वोक्तचतुष्टयसंबन्धेन वोध्यम् । अन्यथा साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपिता कालिकेन महानसीयत्वविशिष्टः सन् समवायेन वह्नित्वविशिष्टः तद्वान् इति ज्ञानीया प्रकारता तन्निरूपितावच्छेदकताविशिष्टासाध्याभावीयप्रतियोगितावच्छेदकता तन्निरूपितत्वस्य साध्यता-

वच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वस्य चोभयस्य हेतुसमानाधिकरणसाध्याभावीय प्रतियोगितायां सत्त्वेन तादृशोभयाभावस्यासत्त्वात् । साध्याभावो न लक्षणघटक इति घटाभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वेनातिव्याप्तेः । तादृशप्रकारतावच्छेदकतायाः तादृशचतुष्टयसंबन्धेनावच्छेदकतायां वैशिष्ट्यविवक्षणे तु नोक्तदोषः । साध्याभावीयप्रतियोगितावच्छेदकतायां तादृशप्रकारतावच्छेदकतावच्छेदकसंबन्धावच्छिन्नत्वाभावेन तादृशप्रकारतावच्छेदकताविशिष्टत्वस्याभावात् । तादृशप्रकारतावच्छेदकता विशिष्टावच्छेदकतानिरूपितत्वस्य साध्याभावीयप्रतियोगितायां विरहेण तादृशोभयाभावस्य तत्र सत्वात् साध्याभावस्य लक्षणघटकत्वोपपत्तेरिति दिक् ।

अथ यद्रूपेण साध्यतावच्छेदकस्य साध्यतावच्छेदकतेति क्वचित्पाठः ।

यद्रूपावच्छिन्नसाध्यतावच्छेदकता तद्रूपानवच्छिन्नावच्छेदकताकप्रकारतावच्छेदकसाध्यतावच्छेदकोभयानवच्छिन्नप्रतियोगिताकहेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरितिफलितम् ।

अथात्र महानसीयवह्निमान् धूमादित्यत्रातिव्याप्तिः । साध्याभावस्य लक्षणाघटकत्वेनान्याभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् । वह्नित्वस्यस्वरूपत एव साध्यतावच्छेदकत्वेन येन रूपेण साध्यतावच्छेदकता तादृशरूपानवच्छिन्नावच्छेदकताकप्रकारतावच्छेदकत्वस्य वह्नित्वत्वविशिष्टवह्नित्वे सत्त्वेन साध्यतावच्छेदकवह्नित्वावच्छिन्नत्व, तादृशप्रकारतावच्छेदकवह्नित्वावच्छिन्नत्वोभयस्य हेतुसमानाधिकरणसाध्याभावप्रतियोगितायां सत्त्वेन तदुभयाभावस्यासत्त्वात्साध्याभावस्य लक्षणाघटकत्वेनान्याभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति चेन्न । एतस्योक्तार्थे एव तात्पर्येणादोषात् ।

तथा च साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितप्रकारतवाच्छेदकताविशिष्टावच्छेदकतानिरूपितत्व, साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्व भयाभाववती या हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगिता तदनवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिः । उभयत्र वै; पूर्वोक्तप्रसिद्धचतुष्टयसंबन्धेन । इयं व्याप्तिः सावच्छिन्ननिरवच्छिन्नसाध्यतावच्छेदकताकोभयसाधारणी । तथा चोभयस्थलीयलक्षणयोरेकोक्तिसंभवः ।

केचित्तु स्वा ( साध्यतावच्छेदका ) नवच्छिन्नप्रकारतावच्छेदकनिष्ठसावच्छिन्नावच्छेदकतानिरूपितत्व, साध्यतावच्छेदकतानिरूपितत्वोभयाभाववती या प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगिता तदनवच्छेदकसाध्यातावच्छेदकावच्छिन्न सामानाधिकरण्यं हेतौ व्याप्तिः । तथा च महानसीयवह्निमान् धूमादित्यत्र नातिव्याप्तिः लक्षणघटकाभावीयप्रतियोगितायां लक्षणघटकसाध्याभावीयप्रतियोगितायां तादृशोभयाभावस्य सत्त्वेन साध्याभावस्य लक्षणघटकत्वात् । महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यत्र नाव्याप्तिः । महानसीयवह्न्यभावीयप्रतियोगितायां तदुभयस्यैव सत्त्वेन तदभावस्य लक्षणाघटकत्वादिति वदन्ति ।

तदसत् । गुणत्ववद्वान् वायुत्वादित्यत्र कालिकविशेषेण स्वरूपतो रूपत्वविशिष्टस्य समवायेन गुणत्ववतः (रूपस्य) हेत्वधिकरणे वायौ अभावः, तदीयप्रतिगितायां साध्यतावच्छेदकगुणत्वावच्छिन्नरूपनिष्ठप्रकारतावच्छेदकतायां सावच्छिन्नत्वविरहेण तादृशसावच्छिन्नावच्छेदकतानिरूपितत्व, साध्यतावच्छेदकगुणत्वनिष्ठावच्छेदकतानिरूपितत्वोभयाभावस्य सत्त्वेन तन्निरूपकसाध्याभावस्य लक्षणघटकत्वेन तत्राव्याप्तेः । वस्तुतस्तु लाघवेन साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वसाध्यतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितत्वोभयाभाव एव साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वपदार्थो वाच्यः ; वै० प्रागुक्तचतुष्टयसंबन्धेन । (स्वसामानाधिकरण्य, स्ववृत्तित्व, स्वानवच्छेदकानवच्छिन्नत्व, स्वावच्छेदकसंबन्धावच्छिन्नत्वैतत्प्रसिद्धचतुष्टयसंबन्धेन । वृत्तित्वञ्च । स्वानवच्छेदकानवच्छिन्नत्वसंबन्धेन ) इति । अथ साध्यतावच्छेदकताविशिष्टान्यसमवायनिष्ठावच्छेदकतानिरूपितत्वस्य समवायावच्छिन्नवह्न्यभावप्रतियोगितायां सत्त्वेन तस्य लक्षणघटकतया साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशो वक्ष्यमाणो व्यर्थः । साध्यतानिरूपितावच्छेदकतात्वस्य धर्मसंसर्गनिष्ठावच्छेदकतासाधारणस्य प्रवेशात् संसर्गतायां ( संसर्गतावच्छेदकतायाम् ) तादृशावच्छेदकताविशिष्टान्यत्वासंभवेनातिव्याप्त्यप्रसक्तेः । विशिष्टान्यावच्छेदकतायांसंबन्धावच्छिन्नत्वप्रवेशे प्रयोजनाभावात् । एवञ्च स्वावच्छेदकसंबन्धावच्छिन्नत्वं स्वानवच्छेदकानविच्छन्नत्वरूपं वाच्यम् । अन्यथा अतिव्याप्तेः । न च समवायस्यापि परंपरं । साध्यतावच्छेदकत्वमेवेति वाच्यम् । महानसीयकालीनवह्निमान् धूमादित्यत्र-

महानसीयवह्न्यभावमादायाव्याप्तेस्साक्षात्साध्यतानिरूपितत्वस्यैव प्रवेश्यत्वात्। न चतत्र कालीनत्वरूपं साध्यतावच्छेदकम् अनवच्छेदकं तादृशप्रतियोगिताया इति नाव्याप्तिरिति वाच्यम्। घटवृत्तिरूपविशिष्टस्य संयोगेन साध्यतायां तद्भूतलत्वे रूपवद् घटवृत्यभावमादायाव्याप्तेः। घटावृत्तितात्वेन घटवृत्तिमात्रस्य परम्परावच्छेदकत्वात्। एवञ्च विशिष्टान्यावच्छेदकतानिरूपितत्वमपि साक्षादेव ग्राह्यम्। अन्यथामहानसीयवह्निवृत्तित्वविशिष्टजातिमत्साध्यकव्यभिचारिणि अतिव्याप्तिरिति चेन्न। संयोगिनः कालिकेन साध्यतायां स्पन्दत्वे हेतौ संयोगिनः संयोगेनाभावमादायाव्याप्तेर्वारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य निवेश्यत्वात्।

साध्यतानिरूपितावच्छेदकत्वस्य धर्मसंसर्गनिष्ठावच्छेदकतासाधारण्ये संसर्गनिष्ठावच्छेदकतायाः संबन्धानवच्छिन्नत्वेन धर्मनिष्ठावच्छेदकतायाः संबन्धावच्छिन्नत्वेन च स्वावच्छेदकसंबन्धावच्छिन्नत्वस्य संबन्धनिष्ठावच्छेदकतायां विरहेण संबन्धनिष्ठावच्छेदकतासाध्यतावच्छेदकताविशिष्टान्यैव भवति तन्निरूपितत्वस्यैव साध्याभावीयप्रतियोगितायां सत्त्वेन तन्निरूपकसाध्याभावस्य लक्षणाघटकत्वेन धूमवान् वह्नेरित्यत्रातिव्याप्तिः स्यात् तद्वारणाय स्वावच्छेदकसंबन्धावच्छिन्नत्वस्य स्वानवच्छेदकसंबन्धानवच्छिन्नत्वरूपोऽर्थो बोध्य इति। एवञ्च साध्यतावच्छेदकताविशिष्टावच्छेदत्वानिरूपितत्वमित्यत्र अन्यावच्छेदकतानिरूपितत्वमपि साक्षादेव ग्राह्यम्।

अन्यथा महानसीयवह्निवृत्तित्वविशिष्टजातिमद्वान् धूमादित्यत्रातिव्याप्तेः। साध्याभावीयप्रतियोगितायां साध्यतया साक्षान्निरूपितजातिनिष्ठावच्छेदकताविशिष्टान्यमहानसीयत्वनिष्ठावच्छेदकतायां परम्परानिरूपितत्वस्य, साध्यतावच्छेदकजातिनिष्ठावच्छेदकतानिरूपितत्वस्य चोभयस्य सत्त्वेन तदुभयाभावस्य तत्र विरहेण साध्याभावस्य लक्षणाघटकत्वापत्तेः। साध्यतावच्छेदकताविशिष्टान्यावच्छेदकतायां साक्षान्निरूपितत्वस्य लक्षणघटकाभावीयप्रतियोगि तायां विवक्षणे तु नोक्तदोषः। महानसीयत्वनिष्ठया साध्यतावच्छेदकताविशिष्टावच्छेदकत्वान्ययाऽवच्छेदकतया साक्षान्निरूपितत्वस्य साध्याभावीयप्रतियोगितायामसत्वेन तादृशोभयाभावस्य सत्त्वात्। साध्याभावस्य लक्षणघटकत्वोपपत्तेरिति चेन्न। संयोगिनः कालिकेन साध्ये स्पन्दत्वे

हेतौ कालिकेन कालः संयोगिमान् स्पन्दत्वादित्यत्र हेत्वधिकरणे संयोगेन संयोगिनोऽभावमादायाव्याप्तेर्वारणाय लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशस्याऽवश्यकत्वात् । अन्यथा तादृशसाध्याभावीयप्रतियोगितायां साध्यतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितत्वस्यासत्त्वेन तादृशोभयाभावस्य सत्त्वात् साध्याभावो भवति लक्षणघटक इति तत्राव्याप्त्यापत्तेः । लक्षणघटकाभावीयप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु न दोषः । तत्र तदसत्त्वात् ।

यत्तु अवच्छेदकभेदेनावच्छेदकताया भेदे सत्त्व. द्रव्यत्व. निष्ठप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताविशिष्टान्यत्वसंभवेन वह्निमान् धूमादित्यत्र हेत्वधिकरणे पर्वते महानसीयवह्निवृत्तित्वविशिष्टजातिमदभावमादाय नाव्याप्तिः । तदभावीयप्रतियोगितायां साध्यतावच्छेदकताविशिष्टान्यसत्त्वद्रव्यत्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपितत्वस्य सत्त्वेन तादृशोभयाभावस्यासत्त्वात् । तदभावो न लक्षणघटक इत्यव्याप्त्यभावेन निरवच्छिन्नसाध्यतावच्छेदकस्थले प्रतियोगितावच्छेदकतायां निरवच्छिन्नत्वनिवेशो व्यर्थ इति तत्तुच्छम् । महानसीयवह्निवृत्तित्वविशिष्टवह्नित्ववदभावमादाय वह्निमान्धूमादित्यत्राव्याप्तेर्वारणाय निरवच्छिन्नसाध्यतावच्छेदकस्थले प्रतियोगितावच्छेदकतायां निरवच्छित्वनिवेशस्यावश्यकत्वात् । साध्यतावच्छेदकताविशिष्टान्यघटत्वादिनिष्ठावच्छेदकतानिरूपितत्वस्य साध्यतावच्छेदकतानिरूपितत्वस्य (साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वस्य) चोभयस्य साध्याभावीयप्रतियोगितायामसत्त्वेन तादृशोभयाभावस्य सत्वात् भवति साध्याभावो लक्षणघटक इति तदीयप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वेन तत्राव्याप्त्यापत्तेः । प्रतियोगितावच्छेदकमहानसीयवह्निवृत्तित्वविशिष्टवह्नित्वनिष्ठावच्छेदकतायाः सावच्छिन्नत्वेन निरवच्छिन्नावच्छेदकताकप्रतियोगिताकाभावत्वाभावेन तादृशाभावस्य न लक्षणघटकत्वमिति तत्राव्याप्त्यभावोपपत्तेः । अवच्छेदकतादेरवच्छेदकरूपतायामेवावच्छेदकभेदेनावच्छेदकताया भेदः संम्भवति । तस्य चासिद्धान्ततया यथाश्रुतेऽपि निर्वाहसंभवाच्चेति । महानसीयवह्निवृत्तित्वविशिष्टजातिमदभावीयप्रतियोगितायां साध्यतावच्छेदकतानिरूपितत्व, साध्यतावच्छेदकताविशिष्टावच्छेदकताभिन्नावच्छेदकतानिरूपितत्वोभयाभावस्य सत्त्वेन तदभावमादाय वह्निमान्धूमादित्यत्राव्याप्तिवारणाय निरवच्छिन्नसाध्यतावच्छेदकस्थले प्रतियोगितावच्छेदकतायां

निरवच्छिन्नत्वनिवेश आवश्यकः । जातिनिष्ठप्रतियोगितावच्छेदकतायां वह्नित्वनिष्ठ-साध्यतावच्छेदकताभेदस्याभावेन तस्याः साध्यतावच्छेदकताविशिष्टान्यत्वाभावात् तादृशाभावमादाय तत्राव्याप्तिवारणाय लक्षणघटकाभावीयप्रतियोगितावच्छेदकतायां-निरवच्छिन्नत्वनिवेशः सार्थकः । तथा च सोऽभावो न लक्षणघटकः । तस्य निरवच्छि-न्नावच्छेदकताकप्रतियोगिताकत्वाभावादिति दिक् ।

अथ साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानच्छिन्नत्वोभयाभाव एव लक्षणाघटकाभावीयप्रतियोगितायां विशेषणमस्तु । अलं तत्र साध्यतावच्छेदकतदितरो-भयानवच्छिन्नत्वोभयाभावनिवेशेन । एवञ्च प्रतियोगितावच्छेदकतायां साध्यता-वच्छेदकतावटकसंबन्धावच्छिन्नत्वम्, प्रतियोगितायां निरवच्छिन्नावच्छेदकतानिरू-पकत्वम् साध्यतावच्छेदकसंबन्धावच्छिन्नत्वञ्च न निवेश्यम्, प्रयोजनाभावात् ।

वह्निमान् धूमादित्यत्र महानसीयवह्निवृत्तित्वविशिष्टजातिमदभावम् विषयितया वह्नित्वविशिष्टाभावम् समवायेन वह्न्यभावञ्चादाय नाव्याप्तिः । तदीयप्रतियोगितायां तदुभयाभावासत्त्वेन तदभावानां लक्षणाघटकत्वात् । धूमवान् वह्नेरित्यत्र नाति-व्याप्तिः । तादृशोभयाभावस्य साध्याभावीयप्रतियोगितायां सत्त्वेन साध्याभावस्य लक्षणघटकत्वात् । साध्यतावच्छेदकत्वाभावमादाय सद्धेतौ लक्षणसमन्वयः । प्रतियोगि-वैयधिकरण्यञ्च प्रतियोगितावच्छेदकसंबन्धेन बोध्यम् । तेन महानसीयवह्निशून्यकाला-वच्छेदेन पर्वते कालिकेन महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यत्र नाव्याप्तिः । महानसे वह्निकालावच्छेदेन पर्वते कालिकेन तदभावस्य वृत्तित्वेन प्रतियोगिसामाना-धिकरण्यमिति तदभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व साध्यतावच्छेदकता-त्वानवच्छिन्नत्वोभयस्य सत्त्वेन तदुभयाभावो न वर्तते इति तदभावस्य न लक्षण-घटकतेति । न वा स्वरूपावैयत्वान्यतरसंबन्धेन वह्निसाध्यके तादात्म्येन वह्नित्वहेतुके वह्नित्वं तादृशान्यतरसंबन्धेन वह्निमत् तादात्म्येन वह्नित्वादित्यत्र येन केनापि संबन्धेन साध्यतावच्छेदकत्वाभावस्य साध्यतावच्छेदकस्वरूपसंबन्धेन प्रतियोगिसामानाधि-करण्येन प्रतियोगिवैयधिकरण्याभावादव्याप्तिः । प्रतियोगितावच्छेदकतादात्म्यसंबन्धेन साध्यतावच्छेदकताभेदस्य प्रतियोगिवैयधिकरण्येन न दोषः । तादात्म्यसंबन्धाव-च्छिन्नप्रतियोतावच्छेदगिकत्वाभाववति साध्यतावच्छेदके साध्यतावच्छेदकस्वरूपसंबन्धेन

प्रतियोगिनः साध्यतावच्छेदकत्वस्य सत्त्वेऽपि प्रतियोगितावच्छेदकतादात्म्यसंबन्धेन तत्रासत्त्वात्, भवति सोऽपि प्रतियोगिव्यधिकरणः। व्यभिचारिणि अतिव्याप्तिवारणाय साध्यवद्वृत्त्यभावीयत्वस्य सद्धेतौ साध्यतावच्छेदकत्वाभावं ग्रहीतुं साध्यतावच्छेदकतात्वानवच्छिन्नत्वस्य च लक्षणघटकाभावप्रतियोगितायां निवेशः। न चावच्छेदकताया अवच्छेदकस्वरूपत्वनये तादात्म्येन प्रमेयविशिष्टस्य तादात्म्येन साध्यतायां घटत्वविशिष्टे घटत्वे वा प्रमेयावच्छिन्नसाध्यतानिरूपितावच्छेदकत्वे वा सद्धेतौ साध्यतानिरूपितावच्छेदकत्वाभावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकसंबन्धमात्रेणैव तादात्म्यादिना स्वप्रतियोग्यधिकरणवृत्तित्वेन प्रतियोगिवैयधिकरण्याभावेन तस्य लक्षणाघटकत्वम्। व्यधिकरणसंबन्धेन साध्याभावस्य साध्यवद्वृत्तित्वञ्चेति लक्षणघटकाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभावः, तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरित्यत्राव्याप्तिः। प्रमेयत्वावच्छिन्नायाः प्रमेयावच्छिन्नसाध्यतानिरूपितावच्छेदकतायाः साध्यतावच्छेदकप्रमेयरूपतया केवलान्वयित्वमिति तस्य सर्वत्र वृत्तित्वेन साध्यतावच्छेदकत्वाभावस्य प्रतियोगिव्यधिकरणस्याप्रसिद्धेरिति वाच्यम्। साध्यतावच्छेदकतात्वनिष्ठसाध्यतावच्छेदकत्वाभावीयप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकस्वरूपसंबन्धावच्छिन्नत्वनिवेशे प्रयोजनविरहेण हेतुसमानाधिकरणस्य विषयितया साध्यतावच्छेदकतात्वविशिष्टाभावस्य प्रतियोगिवैयधिकरण्येन लक्षणघटकत्वमिति तत्राव्याप्त्यभावोपपत्तेः। तथा हि प्रतियोगिव्यधिकरणहेतुसमानाधिकरणविषयित्वसंबन्धावच्छिन्नसाध्यतावच्छेदकतात्वनिष्ठावच्छेदकताकसाध्यतावच्छेदकत्वाभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व साध्यतावच्छेदकतात्वावच्छिन्नत्वोभयाभावस्य सत्त्वेन तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके प्रमेये सत्त्वेन तत्राव्याप्त्यभावोपपत्तेः। हेतुसमानाधिकरणाभावस्य स्वप्रतियोगितावच्छेदकतात्वविषयकज्ञानसामानाधिकरण्याभावेन तदभावे प्रतियोगिवैयधिकरण्यस्य सत्त्वात्

एवं घटः स्व(पट) वृत्तिभेदीयघटत्वावच्छिन्नप्रतियोगितासंबन्धेन पटवान् घटत्वादित्यत्र साध्यतावच्छेदकत्वाभावस्य साध्यतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यविरहेऽपि

प्रतियोगितावच्छेदकतादात्म्येन पूर्वोक्तदिशा प्रतियोगिवैयधिकरण्यसंभवात् ।

केचित्तु प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीयप्रतियोगितायां साध्यवद्-वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभावः, तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्य व्याप्तिरित्यत्र हेत्वधिकरणे द्रव्ये स्वरूप-संबन्धेन गुणाभावो नास्तीति प्रतीतिसिद्धगुणाभावाभावम्, संयोगसमवायाभ्यां हेत्वधिकरणे द्रव्ये गुणाधिकरणत्वात्मकाभावञ्चादाय गुणाधिकरणत्वरूपमभावञ्चादाय अभाववान् वाच्यत्वादित्यत्र स्वरूपसंयोगसमवायैः प्रत्येकं साध्याभावस्य प्रतियोगिवैयधिकरण्यात् अव्याप्त्या एवं समवायेन घटत्वाभावस्य कालिकेन योऽभावः तस्य स्वरूपसबन्धेन साध्यतायां वाच्यत्वे घटत्वाभावाभाववान् वाच्यत्वादित्यत्रव्यभिचारिणि घटत्वा-भावातिरिक्तस्य साध्याभावस्य स्वरूपेणात्मनि वृत्तित्वात् प्रतियोगिसामानाधिक-रण्यमिति अभावान्तरस्यैव लक्षणघटकत्वादतिव्याप्त्या, एवं स्वरूपसमवायसंयोगा-न्यतमेन उक्तसाध्यकसद्धेतौ स्वरूपेण घटत्वात्यन्ताभावाभाववान् आत्मत्वादित्यत्र साध्यवत्ताबुद्धिविरोधिताघटककालिकसंबन्धेन साध्यवदात्मवृत्तित्वाप्रसिद्धया, एवं जात्यभाववान् सामान्यत्वादित्यत्र, (समवायत्वादित्यत्र वा) साध्यवन्निरूपितसामवाय-संबन्धावच्छिन्नवृत्तित्वस्याप्रसिद्धया चाव्याप्त्या, साध्यवत्ताग्रहविरोधिताघटक संबन्धेन साध्यवद्वृत्तित्वस्य च शिवशितुमशक्यतया, स्वप्रतियोगिमत्ताग्रहविरोधिता-घटकसंबन्धेन साध्यवद्वृत्तित्वं वाच्यमिति जात्यभावाभावरूपसाध्याभावस्य प्रतियोगिमत्ताग्रहविरोधितघटकसम्वायेन साध्यवद्वृत्तित्वाप्रसिद्धया अभावान्तर-मादाय जात्यभाववान् वाच्यत्वादित्यत्रातिव्याप्तिरिति वदन्ति । तदसत् । यत्किञ्चित्साध्यवन्निरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वाभाववत् स्वप्रतियोगिमत्ता-ग्रहविरोधिताघटकसंबन्धावच्छिन्नाधिकरणत्वानिरूपकत्वस्य हेतुसमानाधिकरणाभावे विवक्षितत्वात् । तथा च यत्किञ्चित्साध्यवन्निरूपितस्वरूपसंबन्धावच्छिन्न वृत्तित्वा-भाववान् स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसंबन्धावच्छिन्नाधिकरणत्वानिरूपको यो हेतुसमानाधिकरणाभावः, तदीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभावः तत्प्रतियोगितानवच्छेदकसाध्यता-वच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति फलितम् । एवञ्च

अभाववान् वाच्यत्वादित्यत्र गुणाभावाभावरूपे साध्याभावे गुणे यत्किञ्चित्साध्यवद्-द्रव्यनिरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वाभावस्य प्रतियोगिमत्ताग्रहविरोधिता-घटकसमवायसंबन्धावच्छिन्नाधिकरणतानिरूपकत्वस्य च सत्वेन (तादृशविशेषण-विशिष्टतादृशनिरूपकत्वस्यैव सत्वेन) तादृशनिरूपकत्वाभावस्य गुणाभावाभावे गुणेऽसत्वात् साध्याभावमादाय न तत्राव्याप्तिः। स्वरूपसंयोगसमवायान्यतम संबन्धावच्छिन्नघटत्वाभावस्य यः कालिकेनाभावस्तस्य स्वरूपेण साध्यतायां घटत्वा-भावाभाववान् वाच्यत्वादित्यत्र नातिव्याप्तिः। घटत्वाभावरूपे साध्याभावे यत्किञ्चित्साध्यवदात्मनिरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वस्य सत्वेन तादृशवृत्ति-त्वाभावस्यासत्वमिति स्वप्रतियोगिमत्ताग्रहविरोधिताघटककालिकसंबन्धावच्छिन्न-जन्यनिष्ठाधिकरणतानिरूपकत्वस्य सत्वेऽपि विशेषणाभावप्रयुक्तस्य तादृशनिरूपक-त्वाभावस्य तत्र सत्वेन साध्याभावस्य लक्षणघटकत्वात।

तादृशघटत्वाभाववान् (स्वरूपसंयोगसमवायान्यतमसंबन्धावच्छिन्नघटत्वात्यन्ता-भावस्य यः कालिकेनाभावास्यस्य स्वरूपेण साध्यतायाम्) आत्मत्वे हेतौ अयमात्मा घटत्वात्यन्ताभावाभाववान् आत्मत्वादित्यत्र नाव्याप्तिः। घटत्वाभावाभावाभावरूपे साध्याभावे घटत्वाभावरूपेऽपि यत्किञ्चित्साध्यवदात्मनिरूपितस्वरूपसंबन्धावच्छिन्न-वृत्तित्वस्य स्वप्रतियोगिमत्ताग्रहविरोधिताघटककालिकसंबन्धावच्छिन्नजन्यनिष्ठाधिकर-णतानिरूपकत्वस्य च सत्त्वेन तत्र तादृशविशेषणविशिष्टनिरूपकत्वाभावस्यासत्त्वात् प्रतियोगिसमानाधिकरणत्वेन साध्याभावो न लक्षणघटकः किन्तु अभावान्तर एवेति - तदीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात्। तादृशघटत्वाभावस्य यः कालिकेनाभावः तस्य यः स्वरूपेणाभावः स लाघवेन प्रथमाभावरूप एव स्वीकार्यः। नातिरिक्तः। तदीयप्रतियोगितावच्छेदकसंबन्धः स्वरूप इव समवायादिरपि प्रथमाभाव-तृतीयाभावयोरैक्यात्।

एवं जात्यभाववान् सामान्यत्वात् समवायत्वाद्वेत्यत्र नाव्याप्तिः। प्रतियोगि व्यधिकरणहेतुसमानाधिकरणजात्यभावाभावाभावस्य घटत्वाद्यभावरूपत्वेन तत्र साध्य-वत्सामान्यादिनिरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वस्य, स्वप्रतियोगि (जात्यभावरूप-

प्रतियोगि ) मत्ताग्रहविरोविताघटकसमवायसंबन्धावच्छिन्नाधिकरणत्वानिरूपकत्वस्य च सत्त्वेन तादृशोभयत्वस्यैव सत्त्वात् तस्य लक्षणाघटकत्वेऽपि स्वरूपेण साध्यतावच्छेदकताात्वावच्छिन्नप्रतियोगिताकाभावमादाय लक्षणं संगच्छते ।

वह्निमान् धूमादित्यत्र लक्षणघटकघटाभावे विशेपणाभावप्रयुक्ततादृशविशिष्टाभावस्य सत्त्वेन तस्य लक्षणघटकत्वम् ।

वस्तुतस्तु स्वप्रतियोगिमत्ताग्रहेत्यत्र स्वपदं न लक्षणघटकाभावपरम् । किन्तु साध्यवद् वृत्त्यभावपरम् । एवञ्च यथाश्रुते (स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसंबन्धेन साध्यवद्वृत्तित्वमभावस्येति कथनेऽपि) एव हि न दोषस्य संभवः । साध्यवद्वृत्त्यभाव प्रतियोगिमताग्रहविरोधिताघटकसंबन्धावच्छिन्नवृत्तित्वस्यात्र प्रसिद्धेः । सामान्याभाववान् सामन्यत्वादित्यत्र हेत्वधिकरणवृत्तिप्रतियोगिव्यधिकरणघटाभावप्रतियोगितायां लक्षणघटकाभावप्रतियोगिघटवत्ताबुद्धिविरोधिताघटकस्वरूपसंबन्धावच्छिन्नवृत्तित्वं साध्यवज्जातिनिष्ठघटाभावे वर्तते । तथा च साध्यवद्वृत्यभावीयत्वस्य सत्त्वेऽपि साध्यतावच्छेदकतात्वानवच्छिन्नत्वस्य च सत्त्वेन तादृशोभयाभावस्यासत्त्वाद् घटाभावस्य लक्षणघटकत्वेऽपि साध्यतावच्छेदकत्वाभावमादाय लक्षणसमन्वयः । साध्यतावच्छेदकत्वाभावे साध्यवद्वृत्तित्वेऽपि साध्यतावच्छेदकतात्वानवच्छिन्नप्रतियोगिताकत्वाभावेन तदीयप्रतितोगितायां साध्यवद्वृत्यभावीयत्वस्य सत्त्वेऽपि साध्यतावच्छेदकतात्वानवच्छिन्नत्वाभावेन तादृशोभयाभावो वर्तते इति तादृशप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् ।

यत्तु साध्यवद्वृत्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभाववती या प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावीया प्रतियोगिता तदनवच्छेदक साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरित्यत्र अभावे प्रतियोगियवैयधिकरण्यं न निवेश्यम् । कपिसंयोगी एतद्वृक्षत्वादित्यत्र साध्याभावीयप्रतियोगितायां तादृशोमयत्वस्यैव सत्त्वेन तादृशोभयाभावास्यासत्वात् साध्याभावो न लक्षणघटक इति । एवं वह्निमान् धूमादित्यत्र तत्तद्व्यक्त्यभावीयप्रतियोगितायां तदुभयस्यैव सत्वेन तदुभयाभावस्यासत्वमिति तत्तद्व्यक्त्यभावस्य लक्षणाघटकत्वेनानवच्छेदककत्वानु-

सरणं न कर्तव्यम् । तथा च साध्यवद्वृत्त्यभावीयत्वसाध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभाववती या हेतुसमानाधिकरणाभावीया प्रतियोगिता तच्छून्यसाध्यसमानाधिकरण्यं हेतौ व्याप्तिरिति ।

तत् तुच्छम् । तद्वत्ताबुद्धिं प्रति अव्याप्यवृत्तित्वज्ञानाभावविशिष्टतत्तदभाववत्तानिश्चयो विरोधीति अव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वपक्षेऽपि स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसंबन्धेन शुद्धस्वरूपेण समवायावच्छिन्नप्रतियोगिताकसंयोगाभावस्य साध्यवद्वृत्तितया तदीयप्रतियोगितायां तदुभयाभावस्यासत्त्वेन संयोगाभावो न लक्षणघटक इति संयोगी सत्त्वादित्यत्र साध्यतावच्छेदकत्वाभावमादायातिव्याप्तिवारणायानिरवच्छिन्नत्वविशिष्टतादृशस्वरूपेणैव साध्यवद्वृत्तित्वमभावे विवक्षणीयमिति कपिसंयोगाभावस्य तेन निरवच्छिन्नस्वरूपेण साध्यवद्वृत्तित्वाभावात् । तादृशोभयाभावस्य तदीयप्रतियोगितायां सत्त्वेन साध्याभावो लक्षणघटक इति तत्राव्याप्तिवारणाय लक्षणघटकाभावे प्रतियोगिवैयधिकरण्यं निवेश्यम् । न च संयोगी सत्त्वादित्यत्र हेत्वधिकरणे गुणे गुणावृत्तित्वावच्छिन्नाभावमादाय नातिव्याप्तिः । तदीयप्रतियोगित्वस्य साध्ये सत्त्वात् । संयोगरूपसाध्यवति वृक्षे गुणावृत्तिनो द्रव्यत्वस्य संयोगस्य च सत्त्वेन न तदभावस्य साध्यवद् वृत्तित्वमिति तदुभयाभावस्य गुणावृत्तित्वावच्छिन्नाभावीयप्रतियोगितायां सत्त्वेन तदभावस्य लक्षणघटकत्वात् संयोगी सत्त्वादित्यत्रातिव्याप्तिविरहेण निरवच्छिन्नविशेषणं तादृशस्वरूपसंबन्धे न देयमिति वाच्यम् । संबन्धविशेषावच्छिन्नत्वस्य (हेतुसमानाधिकरणाभावीयप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य, एवं तादृशाभावीयप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबन्धावच्छिन्नस्य चानिवेशे) अविशेषणत्वे स्ववृत्तिभेदीयवह्नित्वावच्छिन्नप्रतियोगितास्वरूपान्यतरसंबन्धेन (अत्र स्वपदं साध्यतावच्छेदकतात्वपरम्) साध्यतावच्छेदकतात्वविशिष्टवह्नेः समवायेनाभावमादाय वह्निमान् धूमादित्यत्राव्याप्तेः । तदीयप्रतियोगितायां तदुभयाभावस्य सत्त्वेन तत्प्रतियोगिताशून्यत्वस्य साध्येऽसत्त्वात् । अतस्तत्राव्याप्तिवारणायानवच्छेदकत्वानुसरणस्यावश्यकतया गुणावृत्तित्वावच्छिन्नाभावमादाय संयोगी सत्त्वादित्यत्रातिव्याप्तिवारणासंभवात् । तदीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् । यदि च हेत्वधिकरणे गुणे

स्व (संयोग) वृत्तिसंयोगत्वाश्रयाश्रयत्वसंबन्धावच्छिन्नप्रतियोगिताकसाध्याभावमादाय संयोगी सत्त्वादित्यत्रातिव्याप्तिवारणं संभवति । तदीयप्रतियोगितायाः साध्ये सत्त्वात् । तत्रातिव्याप्तिवारणायानवच्छेदकत्वानुसरणं न कर्तव्यम् । सोऽभावो न साध्यवति वृक्षे वर्तते स्ववृत्तिसंयोगत्वाश्रयाश्रयत्वसंबन्धेन संयोगस्य व्याप्यवृत्तितया स्वाधिकरणे स्वाभावस्यासत्त्वात् । तदा सबन्धविशेषेण लक्षणघटकाभावे हेतुसामानाधिकरण्यस्य वाच्यतया यथासन्निवेशे न प्रतियोगिवैयधिकरण्यस्य वैयर्थ्यमिति गृहाण । अयं भावः । संयोगी सत्त्वादित्यत्र साध्याभावीयप्रतियोगितायां साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवाच्छिन्नत्वोभयसत्त्वेन साध्याभावो न लक्षणघटक इति तत्रातिव्याप्तिवारणाय निरवच्छिन्नस्वरूपेण साध्यवद्वृत्तित्वमभावे वाच्यम् । तथा सति साध्याभावमादाय कपिसंयोगी एतद्वृक्षत्वादित्यत्र व्याप्तिवारणाय लक्षणघटकाभावे प्रतियोगिवैयधिकरण्यं निवेश्यमिति ।

एतेन संयोगसाध्यकव्यभिचारिणि संयोगी सत्त्वादित्यत्रातिव्याप्तिवारणाय स्वप्रतियोगिमत्ताबुद्धिविरोधिताघटकसंबन्धस्य (स्वरूपसंबन्धस्य) निरवच्छिन्नत्वविशेषणत्वे तद्वृक्षवृत्तिकपिसंयोगाभावैतद्वृक्षवृत्तिकपिसंयोगाभावान्यतरस्य निरवच्छिन्न स्वरूपेण साध्यतायां वृक्षत्वे सद्धेतौ प्रत्येकाभावमादायाव्याप्तिवारणायानवच्छेदकत्वानुसरणम्, सति च तस्मिन् (अनवच्छेदकत्वानुसरणे) संयोगी सत्त्वादित्यत्रातिव्याप्तिवारणाय तादृगस्वरूपसम्बन्धे निरवच्छिन्नत्वविशेषणमिति परस्पराश्रयोऽपि अपास्तः । यथा सन्निवेशे प्रतियोगिवैयधिकरणनिवेशस्य न वैयर्थ्यमिति कथनेनापास्तः । साध्यवद् वृत्त्यभावीयत्वञ्च साध्यवन्निरूपितवृत्तितावच्छेदकानुयोगिताविशिष्टत्वं वाच्यम् । तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः । अन्यथा हेतुसमानाधिकरणसाध्याभावीयप्रतियोगितायां साध्यवद् (गुण) वृत्त्यभावीयत्वस्य, साध्यतावच्छेदकतात्वानवच्छिन्नत्वस्य च सत्त्वेन तदुभयाभावस्यासत्त्वात् । साध्याभावस्य लक्षणाघटकत्वेन साध्यतावच्छेदकत्वाभावमादाय तत्रातिव्याप्त्यापत्तेः । वै० स्वनिरूपितत्व, स्वनिष्ठानुयोगितानिरूपितत्वोभयसंबन्धेन । एतदुक्तौ च नोक्तदोषः । साध्यवद्गुणनिरूपित वृत्तितावच्छेदकानुयोगित्वं न विशिष्टसत्ताभावाभावत्वं किन्तु शुद्धसत्ताभावाभावत्वमेव तन्निरूपितत्वस्य साध्याभावीयप्रतियोगितायामसत्त्वेन तादृशोभयाभावस्य तत्र

सत्त्वात् साध्याभावो लक्षणघटक इति तदीयप्रयोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके सत्त्वात् । स्वनिष्ठानुयोगित्वानिरूपितत्वकथनेन संयोगसंबन्धावच्छिन्नवाच्यत्वा-भावभिन्नं वाच्यत्वादित्यत्र नातिव्याप्तिः । हेतुविकरणवृत्तिसंयोगसंबन्धावच्छिन्न प्रतियोगिताकवाच्यत्वाभावभेदरूपसाध्याभावीयप्रतियोगितायां साध्यवद्घटादि निरूपितवृत्तितावच्छेदकसंयोगसंबन्धावछिन्नवाच्यत्वाभावनिरूपितत्व, तन्निष्ठानुयो-गितानिरूपितत्वयोः सत्त्वेन तन्निष्ठानुयोगित्वानिरूपितत्वस्यासत्त्वात् । साध्य-वन्निरूपितवृत्तितावच्छेदकानुयोगिताविशिष्टत्वरूपसाध्यवद्वृत्त्यभावीयत्वस्यासत्त्वेन साध्यवद्वृत्त्यभावीयत्व, साध्यतावच्छेदकतात्वानवच्छिन्नत्वोभयाभावस्य तत्र सत्त्वात् । तन्निरूपकसाध्याभावस्य लक्षणघटकत्वोपपत्तेः । भेदाभावस्य प्रतियो-गितावच्छेदकरूपत्वेन संयोगसंम्बन्धावछिन्नवाच्यत्वाभावभेदाभावस्य संयोगसंबन्धा वच्छिन्नवाच्यत्वाभावरूपत्वम् । तस्य च साध्यवन्निरूपिता या साध्यनिष्ठा वृत्तिता तदवच्छेदकत्वमपि तत्र वर्तते । अभावस्यानुयोगिताविशेषत्वात् अनुयोगित्वरूपत्व-मिति चेन्मैवम् । अवच्छेदकतावान् वाच्यत्वादित्यत्र हेतुसमानाधिकरणाभावप्रति-योगितायां संबन्धविशेषावच्छिन्नत्वस्यानिवेशेन संयोगेन साध्याभावमादायाव्याप्तेः । साध्याभावीयप्रतियोगितायां साध्यतावच्छेदकतात्वानवच्छिन्नत्वाभावेन तादृशोभया-भावो वर्तते । भवति च साध्याभावो लक्षणघटकस्तदीयप्रतियोगिताशून्यत्वस्य साध्येऽ-सत्त्वेन साध्यतावच्छेदके तादृशप्रतियोगितानवच्छेदकत्वस्यासत्त्वात् । अवच्छेदकता-वान् वाच्यत्वादित्यत्राव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यं वक्तव्यम् । तथा च नोक्तदोषः । साध्याभावस्य साध्यतावच्छेदकस्वरूपसंबन्धेन प्रति-योगिसामानाधिकरण्येनान्याभावमादाय लक्षणसमन्वय इति ।

# कलिवर्ज्य–ऐतिहासिक मूल्यांकन

डॉ० रणजीत सिंह

ऋग्वेद के मंत्रों में युग शब्द का जो भी अर्थ हो किन्तु वहाँ कृत, त्रेता, द्वापर एवं कलि नामक विख्यात युगों के नाम नहीं प्राप्त होते हैं। इस वेद में कलि शब्द का अर्थ कदाचित् द्यूत में पासे के बीजों का सुव्यवस्थित उत्क्षेपण (फेंकने के अर्थ में) है [1]। अथर्ववेद में कृत का यही अर्थ प्रयुक्त है। [2] इसी वेद में कलि का अर्थ पासे फेंकने से है। [3] कृत, त्रेता, द्वापर एवं "आस्कन्द" शब्द संहिताओं और शतपथब्राह्मण में प्रयुक्त हुए हैं। [4] तैत्तिरीयब्राह्मण में "आस्कन्द" के स्थान पर कलि शब्द आया है। [5]

उपर्युक्त ग्रन्थों में सभी स्थानों में कृत और अन्य तीन शब्द द्यूत में पासे फेंकने के अर्थ में प्रयुक्त हुए हैं। तैत्तिरीयब्राह्मण [6] में चार स्तोम (त्रिवृत, पंचदश, सप्तदश एवं एकविंश) कृत हैं और पाँच कलि है, ऐसा वर्णित है। इससे स्पष्ट है कि कृत चार वार या चार के गुने के अर्थ में लिया जाता था, जब चार के भाग देने पर एक शेष रहता था।

---

●१०५ सी०, अलोपीबाग, इलाहाबाद

१—ऋग्वेद, १०।३४।६; १०।४३।५।

२—अथर्ववेद, ७।५२।२, ५,६।

३—वही, ७।११४।१।

४—तैत्ति० सं०, ४।३।३;
वाज० सं०, ३०।१८; ४;
शत० ब्रा०, १३।६।२।९–१०।

५—तैत्ति० ब्रा०, ३।४।१६।
द्रष्टव्य, जे० डी० एम० डेरेट, रिलीजन ला एण्ड स्टेट इन इंडिया, लन्दन, १९६८, पृ० ८८–९; २०७।

६—तैत्ति० ब्रा०, १।५।११।

ऐतरेयब्राह्मण[1] में कृत एवं अन्य तीन शब्दों का प्रयोग किया गया है। सोया हुआ व्यक्ति कलि है, उठने के लिए सन्नद्ध होते समय वह द्वापर हो जाता है, जब उठता है तो त्रेता और जब इधर-उधर चलने लगता है तो कृत हो जाता है।

शतपथब्राह्मण[2] में कलि को "अभिभू" (हराने वाला) बताया गया है एवं इस प्रकार निर्देशित है कि कलि, उस पाँच का उदाहरण है, जो दूसरों को पराजित करता है। यही अर्थ छान्दोग्योपनिषद् और मुण्डकोपनिषद् में भी लिया गया है।[3] इससे स्पष्ट है कि वैदिक साहित्य के अन्तिम चरणों (उपनिषदों) तक कृत, त्रेता एवं कलि द्यूत-क्रीड़ा में पासा फेंकने के अर्थ में लिये जाते थे और यह संदेहात्मक है कि वे शब्द विश्व के विभिन्न युगों के द्योतक थे। यही नहीं, महाभारत में भी कृत और द्वापर शब्द उसी अर्थ में प्रयुक्त हैं।[4] ब्यूलर का मत है "गौतम के काल में कलि निश्चित अवधि के लिए नहीं प्रयुक्त है; अपितु समय अच्छा (सुख-सुविधा पूर्ण) रहने पर दूसरे नाम से कहते थे और जब समय अच्छा नहीं रहता था, तब उसे कलि नाम से पुकारते थे,,।[5] गौतम धर्मसूत्र तथा आपस्तम्बधर्मसूत्र में काल-अवधारणा में विशेष परिवर्तन परिलक्षित नही होता है। इससे स्पष्ट है कि प्रारंभिक धर्मसूत्रों के समय में भी युगसंबंधी सिद्धान्त का पूर्ण विकास नहीं हुआ था।

महाभारत, स्मृतियों एवं पुराणों से पता लगता है आदिकाल में आदर्श समाज की स्थापना थी, जो क्रमशः कालान्तर में अपेक्षा कृत अवनति को प्राप्त हो गया तथा

---

१—ऐ० ब्रा०, ३३।३।
तु० की०, डा० काणे,पी० वी०, हिस्ट्री आफ धर्मशास्त्र, जिल्द ३, पृ० ६८७-६८, बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० १६६। राबर्ट लिंगत का लेख—टाइम एण्ड धर्म आन मनु, १,८५-८६।
इंडियन सोशियालाजी, भाग ६ (१९६२) में प्रकाशित, पृ० ७–१६।

२—शत० ब्रा०, ५।४।४।६।

३—छान्दो० उ०, ४।१।४।

४—महा० विराटपर्व, ५०।२४।

५—ब्यूलर द्वारा उद्धृत बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० १६७।

मानव की नैतिकताओं, स्वास्थ्य एवं जीवन-दीर्घता में क्रमशः ह्रास दृष्टिगोचर होने लगा।[1] इन ग्रन्थों में युगों के चारों नाम निर्देशित हैं एवं पुराणों में तो कलि का विशेष वर्णन है।[2]

युगसंबंधी सिद्धान्त के सीमा निर्धारण में ऐतिहासिक अभिलेख भी सहायता करते हैं। अशोक के शिलालेख (संख्या ४,५) में, जो कालसी और दो अन्य स्थानों के हैं, निम्न शब्द उल्लिखित हैं—(आव्कपं) यावत् कल्पम् तथा गिरनार वाले में (आव सम्वर कप), जिसका अर्थ है कल्प के अन्त तक जब कि संवर्त नामक बादल एवं अग्नियां उमड़ेंगी[3]। इससे स्पष्ट है कि युगों के सिद्धान्त का उदय ईसा पूर्व चौथी या तीसरी शताब्दी में हो गया था और ईसा के उपरान्त प्रथम शताब्दी के आते-आते उसका पूर्ण विकास हो गया था।

आपस्तम्बधर्मसूत्र[4] में पैतृक सम्पत्ति को संपूर्ण रूप में या अधिकांश रूप में ज्येष्ठ पुत्र को देना वर्जित है। इसी में दूसरे स्थान[5] पर कुछ अन्य लोगों के मत की

१—महा०, शान्ति पर्व, ५९।
मनु स्मृ०, १। ८१।
नारद०, १।१–२।
महा० उद्योगपर्व, १३२।१७; वही, शान्तिपर्व, २१।२९'
मनुस्मृ०, ६।३०१–२।

२—कॉर्पुस इन्स्क्रिप्सियोनुम् इंडिकारुम् जिल्द, १, पृ० ८,१०,३०–३३।

३—एपिग्राफिया इंडिका, जिल्द ८, पृ० ३६,४३।
तालुगुण्ड अभिलेख, एपि० इंडिका, जिल्द ८, पृ० ३४।
काणे, पी० वी०, धर्मशास्त्र का इतिहास, हिन्दी संस्करण, द्वितीय भाग, पृ० ९८५।

४—आप० ध० सू०, २।६।१४।६–१०।

५—वही, २०।१०।२७।२–६।

ओर संकेत करते हुए कि स्त्री विवाहित होने पर वर के संपूर्ण परिवार को प्रदान कर दी जाती है , नियोगप्रथा को भी निन्दनीय माना है। ये दोनों आचार कलिवर्ज्य में आते हैं। अपरार्क[1] ने बृहस्पति को उद्‌धृत करते हुए उन आचारों के प्रति संकेत किया है जो पहले की स्मृतियों में प्रतिपादित थे, किन्तु कलियुग में वर्जित मान लिए गये हैं, यथा नियोग एवं कुछ गौण पुत्र द्वापर एवं कलियुग में असंभव ठहरा दिये गये हैं। प्रजापति[2] के अनुसार श्राद्धों में मांस एवं मदिरा की प्राचीन प्रथा अब कलियुग में वर्जित कर दी गयी है। संस्कार विहित कुण्ड एवं गोलक पुत्र जो पहले युगों में स्वीकृत थे, कलियुग में वर्जित हैं। विश्वरूप एवं मेधातिथि ने कलिवर्ज्य के विषय में एक भी उद्धरण नहीं दिये हैं, यह विचारणीय है। मेधातिथि के अनुसार धर्म (गुण या वस्तुओं के स्वभाव) युग-युग में उसी प्रकार परिवर्तित होते हैं, जैसे—ऋतु पर ऋतु। इससे स्पष्ट है कि भाष्यकार के अनुसार एक युग में प्रचलित आचार दूसरे में निन्दनीय हैं। विज्ञानेश्वर ने कलियुग में नियोग-प्रथा, ज्येष्ठपुत्र को अधिकांश देना तथा यज्ञ में गोहत्या निन्दनीय बताया है।

स्मृतिचन्द्रिका में दीर्घकाल तक ब्रह्मचर्य तथा कमण्डलु धारण करना, सगोत्र तथा सपिण्ड विवाह करना, गोवध, नरमेध, अश्वमेध तथा मदिरापान करना द्विजातियों (ब्राह्मण, क्षत्रिय तथा वैश्य) के लिए वर्जित है। श्रीधर ने (१११५-१२०० ई०) युगधर्म के परिप्रेक्ष्य में कलिवर्ज्य का परिचय दिया है।

समयाचारिता धर्मा जातिदेशकुलोद्भवाः।
ग्रामाचाराः परिग्राह्या ये च विध्यविरोधिनः ।।१५।।
युगधर्माः परिग्राह्याः सर्वत्रैव यथोचितम्।
यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तत् ।।१६।।
द्वापरे तच्च मासेन अहोरात्रेण तत्कलौ।
देवरेण सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः ।।१७।।

---

१—अपरार्क, पृ० ७३६।
२—प्रजापति, १५१।
३—श्रीधर, स्मृत्यर्थसार, १५-२५, पृ० २।

दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ।

समुद्रयात्रास्वीकारः कमण्डलुविधारणम् ।।१८।।

असवर्णासु कन्यासु विवाहश्च द्विजातिषु ।

वृतं स्वाध्यायसापेक्षमघसंकोचनं तथा ।।२०।।

अस्थिसंचयनादूर्ध्वमङ्गस्पर्शनमेव च ।

प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ।।२१।।

संसर्गदोषः पापेषु मधुपर्के पशोर्वधः ।

दत्तौरसेतरे वा तु पुत्रत्वेन परिग्रहः ।।२२।।

सत्रदीक्षा च स्तेयान्यमहापातकनिष्कृतिः ।

प्रतिमाभ्यर्चनार्थाय संकल्पश्च सधर्मकः ।।२३।।

दीर्घकालं ब्रह्मचर्यंनरमेधाश्वमेधकौ ।

कलौ युगे त्विमान्धर्मान्विवर्ज्यानाहुर्मनीषिण : ।।२५।।

उसी के साथ-साथ गद्यभाग भी प्राप्त होता है । संभवतः कलिवर्ज्य के संदर्भ में यह तालिका पूर्व वर्णित संख्या की अपेक्षा अधिक लम्बी प्रतीत होती है ।[१] इसी प्रकार का उल्लेख गरुड पुराण, कलिवर्ज्यविनिर्णय, धर्मसिन्धु आदि में लिपिबद्ध है । दलपति कृत नृसिंहप्रसाद ( १४९०-१५१२ ई० ) में २७ प्रकार के कर्मों को वर्जन की तालिका में रखा गया है । सुविधा की दृष्टि से इन दो वर्जित कर्मों को चार श्रेणी में विभाजित किया गया है । धार्मिक कृत्य संबंधी, सामाजिक ( वर्णाश्रम ) संबंधी, अपवित्रता और शुद्धीकरण संबंधी तथा विधिपरक ।

---

१—द्रष्टव्य, बटुकनाथ भट्टाचार्य, कलिवर्ज्यं, पृ० १०-११ ।

**धार्मिक कृत्य यज्ञ-यागादि संबंधी वर्जित कर्म**-अग्निहोत्र; त्रेतापरिग्रह; प्रजारणिपरिग्रह; लोढापरिग्रह; मुखाग्निधमन; नरमेध; अश्वमेध; राजसूय; गोमेध; अतिथि-पितर (पूर्वजों) के लिए पशुवध ; शमित्र-यागीय पशु की पुरोहित द्वारा हत्या ; यज्ञों में सुरा का प्रयोग ; सोम-विक्रय, सत्रदीक्षा ; सधर्म्मक प्रतिमा पूजा - किसी प्रतिज्ञा में देवता की उपासना आदि।

**चातुर्वर्ण्य आश्रम संबंधी कर्म**—दीर्घकाल तक ब्रह्मचर्य; नैष्ठिक ब्रह्मचर्य; गुरुवद् गुरुदारवृत्ति;गुरु पत्नी के साथ आचरण ; आपद्वृत्ति-आपात स्थिति से संबंधित कार्य; शूद्रपाचकता अर्थात् शूद्र द्वारा भोजन तैयार करना; उच्छिष्टापवर्जन अर्थात् उच्छिष्ट अन्न देना; प्रवासित्व-अर्थात् गृह से दूर निवास करना; दूरतीर्थ यात्रा; वानप्रस्थ; महाप्रस्थान–गमन-अर्थात् मृत्यु-यात्रा; सन्यास या संसार त्यागने की भावना; सर्व्ववर्ण-भिक्षा-अर्थात् सभी वर्णों या जातियों से भिक्षा-याचना; यत्रसायंगृहस्थत्व-अर्थात् रात्रि आने पर जहाँ हो, वहीं रुक जाना।

**धार्मिक कृत्य अशौच से संबंधित कर्म**—गोतृप्तिशिष्टपयसाचमनम्, नवोदकेदशाहम्, अघसंकोचनं पापिसंसर्गदोषः; स्तेयान्यमहापातकनिष्कृतिः, शोधितासवर्णादुष्टसंस्पर्शः, बलात् कृतासंसर्ग, गुरुस्त्रीत्याग।

---

१- बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० १४,

काणे, पी. वी., हिस्ट्री आफ धर्मशास्त्र, जिल्द ३, पृ० ९२७-६८।

**विधिपरक कार्यों का वर्जन**—पितापुत्रविरोधेसाक्षिदण्ड : –पिता पुत्र के वाद में गवाही देने वाले को दण्ड; आततायिब्राह्मणवधः—दुष्टब्राह्मणवध; मातुलकन्याविवाह — मामा की कन्या से विवाह; असवर्ण विवाहः; अन्तर्जातीय विवाह; नियोग, पति से दिवंगत होने पर उसके सहोदर से समागम कराना। विधवाविवाह, पति के दिवंगत होने पर पत्नी का पुनर्विवाह। दत्तौरसेतरपुत्र, विधिविहित तथा दत्तक पुत्र संबंधी समभागिता के प्रति विहित नियम, ज्येष्ठांश – पत्नी से उत्पन्न प्रथम या सब से श्रेष्ठ पुत्र को अन्य पुत्रों की अपेक्षा अधिक भाग प्रदान करना।

उपरोक्त वर्णित कार्यों को कलियुग में न करने अथवा उनसे बचने का उपाय कलिवर्ज्य के अन्तर्गत वर्णित है।

**धार्मिक कृत्य संबंधी कलिवर्ज्य : सत्र**–यज्ञ संबंधी कार्यों से संबंधित है। पहले कुछ यज्ञ १२ दिनों, वर्ष भर, १२ वर्षों या उससे अधिक कालों तक चलते रहते थे जिन्हें करने का अधिकार केवल ब्राह्मणों को प्रदत्त था।[२] शबर के मतानुसार सत्रों के आरम्भ कर्ता को १७ वर्षों से कम का तथा २४ वर्षों से अधिक अवस्था के न होने का विधान दिया गया है। सत्रों को करनेवालों में सभी लोग–यजमान या पुरोहित

---

१– तु० की०, बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० १४ १५।

२– जैमिनिसूत्र, ६। ६। १६-२३।

दोनों याज्ञिक (यजमान) माने जाते थे।[1] कलिवर्ज्य होने का कारण यह है कि इनमें बहुत समय धनादि लगता था और लोग परिश्रम-साध्य वैदिक यज्ञों के बदले में सरल कृत्य करना अच्छा समझने लगे थे।

**यज्ञ में गोवध**—प्राचीन काल में कुछ अवसरों पर गोवध होता था।[2] अग्निष्टोम की उदयनीया इष्टि के अन्त में गाय ( अनुबन्ध्या ) की बलि देने का विधान प्रस्तुत किया गया है। मधुपर्क में, जो किसी सम्मानित अतिथि को दिया जाता था, एक गाय को मारने की आज्ञा थी, या वह अतिथि की इच्छा के अनुसार स्वतन्त्र कर दी जाती थी।[3] तीन या चार अष्टका श्राद्धों में से किसी में एक गाय-वध की बात वर्णित है।[4] आपस्तम्बधर्मसूत्र[5] में उल्लेख है कि यदि श्राद्ध में गोमांस प्रदान किया जाय तो पितर एक वर्ष तक तृप्त रहते हैं।

कालान्तर में मांस-भक्षण निन्दनीय हो गया, गोहत्या वर्जित कर दी गयी[6]।

---

१– तु० की०, काणे, पी० वी०, धर्मशास्त्र का इतिहास, खंड २, अध्याय ३५, ( हिन्दी संस्करण )

२– वाज० संहिता, २४।८, मैत्रा० संहिता, ३।१३।१७; १७०।६ २८।३३।

३- पार० गृ० सू०, १।३।२६-३१।

४- खादिर गृ० सू०, ३।४।१, गोभिल गृ० सू०, ३।१०।१६।

५- आप० ध० सू०, २।७।१६।२५।

६- मनु०, ३।२७१।; याज्ञ० स्म०, १।१०९। विशेष, काणे, पी० वी०, हिस्ट्री आफ धर्मशास्त्र, जिल्द १, भाग १, पृ० ३६, बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ०२९-३३।

गोवध का कलिवर्ज्य में उल्लेख होने का कारण भारत की तत्कालीन कृषि-प्रधान व्यवस्था थी, इसके अतिरिक्त अहिंसा का सिद्धान्त भी था। बौद्धधर्म के विकास के परिणामस्वरूप भारतीय समाज में अहिंसा का अपेक्षाकृत विशेष महत्व हो रहा था[1]।

**मद्यपान** –वैदिककाल में पुरोहित लोग सोमपान करते थे और मदिरा का प्रयोग जन साधारण में होता था। मदिरा साधारणतः देवताओं को नहीं दी जाती थी। सोम और सुरा का भेद लोगों को मालुम था[2]। सौत्रामणी इष्टि में सुरापान के लिए ब्राह्मण की अप्राप्ति पर उस मदिरा को चीटियों के टीले पर गिरा देने का विधान है।[3] काठक[4] संहिता से ज्ञात होता है कि उस काल तक आते-आते सुरापान को ब्राह्मणों ने पापपूर्ण मान लिया था। छान्दोग्योपनिषद् में सुरापान पांच प्रकार के महापापों में वर्णित है।[5] कालान्तर में मद्यपान वर्जित किया गया है[6], किन्तु इसके पीछे वर्ण-सिद्धान्त का नियम प्राप्त होता है। ब्राह्मण के लिए यह सदैव वर्जित है[7]। कतिपय ग्रंथों में क्षत्रियों और वैश्यों के लिए आज्ञापित है।[8]

---

१- तु० कीं०, बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० ३३-३४।

२- तैत्ति० सं०, २।५।१।१।, वाज सं०, १९।७। शत० ब्रा०, ५।१।५।२८।

३—श० ब्रा०, १।८।६, शबर भा०–जैमिनिसूत्र, ३।५।१४।१५।

४—काठकसंहिता, १२।१२।

५—छान्दो० उ०, ५।१०।९।

६—मनु०, ११।५४, वि० स्मृ०, ३५।१।

७—आप० ध० सू०, १।५।१७।२१; १।७।२१।८;
मनु०, ११।९५; मनु स्मृ०, ११।९३ द्विजातिवर्जित; वशिष्ठ०, १।२०।

८—महा० उद्योगपर्व, ६९।५; विष्णु स्मृ०, २२।८४, तु० की०, काणे, पी० वी०, धर्मशास्त्र का इतिहास, द्वितीय भाग, पृ० १००८-९, ( हिन्दी संस्करण ); बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० ३७, ३९, ४२।

**ब्राह्मण द्वारा सोम-विक्रय**—केवल ब्राह्मण ही सोम-रस पान करते हुये बताये गये हैं जिसके लिए प्रतीकात्मक मोल-तोल होता था।[1] किन्तु कालान्तर में सोमविक्रेता ब्राह्मण को श्राद्ध में निमन्त्रण के अयोग्य बताते हुए उसके यहाँ भोजन करना वर्जन में मिलता है [2]।

**अग्नि प्रज्ज्वलित करने के लिए मुंह से फूंकना**—मनुस्मृति एवं ब्रह्मपुराण में मुख से अग्नि को फूंकना वर्जित है, क्योंकि ऐसा करने से थूक की बूंदों से अग्नि अपवित्र हो सकती है किन्तु हरिदत्त एवं गोभिलस्मृति में मुख से फूंक कर जलाने का भी विधान है।[3] अतः दोनों प्रक्रियाओं के प्रचलन का संकेत है।

**नरमेध**—तैत्तिरीयब्राह्मण में नरमेध-विधि का वर्णन है।[4] प्राचीनतम उक्तियों से यह नहीं विदित होता है कि मानव-वध होता था या सारी विधि प्रतीक मात्र है।[5] श्रौतसूत्रों से ज्ञात होता है कि अग्नि एवं सोम को पशु भेंट किये जाते थे[6]। किन्तु पुरातात्विक उत्खनन से प्राप्त प्रमाणों के आधार पर यह निर्विवाद रूप से सिद्ध है कि नर-हत्या होती थी।[7]

---

१—कात्या० श्रौ० सू०, ७।६।२-४; आप० श्रौ० सू०, १०।२०।१२।

२—महा० शान्ति०, १६५।७; मनु स्मृ०, ११।६०, तु० की०, बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० ४३-४४, काणे, पी० वी०, हिस्ट्री आफ० धर्मशास्त्र, जिल्द ३, पृ० ९२७।६८।

३—हरिदत्त, आप० ध० सू०, १।५।१५।२० पर भाष्य; गो० स्मृ०, १।१३५-१३६।

४—शत० ब्रा०, ३।४।१-१९।

५—वही, ३।४।१; वाज० सं०, ३०।५।

६—आप० श्रौ० सू०, २०।१।२४; २०।२४।१६-१७।

७—प्रो० जी० आर० शर्मा, दी एक्सकवेशन्स ऐट कौशाम्बी, पृ० ८६-१३६।
तु० की०, बटुकनाथ भट्टाचार्य,। कलिवर्ज्य, पृ० २३-२४।
विशेष, काणे, पी० वी०, हिस्ट्री आफ धर्मशास्त्र, जिल्द ३।

**अश्वमेध**—वैदिक साहित्य[1] में अश्वमेध का उल्लेख मिलता है। तैत्तिरीय-संहिता[2] में उल्लेख है कि अश्वमेध यज्ञ करने वाला व्यक्ति ब्रह्म-हत्या के पाप से मुक्त हो जाता है किन्तु कालान्तर में यह वर्जित कर दिया गया।[3] ऐतिहासिक काल के कतिपय राजाओं के (ई० पू० २०० से १८ वीं शताब्दी तक) अश्वमेध करने का उल्लेख है।[4] कालान्तर में बौद्धधर्म तथा पौराणिकधर्म में अहिंसा के प्रभाव के कारण यह रोका गया है।

**राजसूय**—यह एक जटिल कृत्य था जो अनवरत दो वर्षों तक किया जाता था। इस यज्ञ को करने का अधिकार क्षत्रिय राजाओं को था।[5] कलिंगराज खारवेल तथा रानी नायनिका ने भी इसे संपादित किया था[6]।

---

१ – बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० २५-२६।

२—तैत्ति० सं०, ५।३।१२।२।

३—आप० गृ० सू०, २१।१।

४—गुप्त सम्राटों ने भी अश्वमेध किया था जो कुषाणों के पश्चात् बहुत दिनों बाद हुआ था, कॉर्पुस इन्स्क्रिप्तियोनुम्, जिल्द ३, नं० १२।; स्कन्दगुप्त, समुद्रगुप्त के पाषाण स्तम्भलेख। इन्द्रविष्णु ब्राह्मण राजा ने कई यज्ञ किये, वही, जिल्द ३, नं० ३६।

पुलकेशिन् द्वितीय, आदित्यसेन (उत्तरगुप्तकालीन) तथा पल्लव राजाओं ने भी अश्वमेध संपादित किया था।

स्मिथ, अर्ली हिस्ट्री आफ इंडिया, पृ० ३३२-४४१।

कीर्त्तिवर्मन चालुक्य राजा ने अश्वमेध किया था दे०, बादामी गुहा अभिलेख इंडियन ऐन्टीक्वेरी, जिल्द ६, पृ०, ३६३।

५—काणे, पी० वी०, हिस्ट्री आफ धर्मशास्त्र, जिल्द ३, पृ० ६२७-६८।

६—एपि० इंडिका०, जिल्द २०, पृ० ७१ एवं ७९।

नानाघाट का अभिलेख, आर्कयोलाजिकल सर्वे आव वेस्टर्न इंडिया, जिल्द ५, पृ० ६०।

तु० की०, बटुकनाथ, भट्टाचार्य, कलिवर्ज्य, पृ० २४-२७।

**पशुयज्ञ**—अपरार्क ने मार्कण्डेयपुराण को उद्धृत करते हुए कलियुग में पशुयज्ञ वर्जित कर दिया है। यद्यपि क्रमशः सामान्य भावना यही रही कि श्राद्धों एवं मधुपर्क में मांस-दान न किया जाय, तथापि सभी युगों में पशुवध होते रहे हैं और आज भी विरोधों के होते हुए भी यही परिपाटी चलती आ रही है। वैदिक युग में पशुयज्ञों की अनेक विधायें वर्णित हैं।[1]

**किसी विशिष्ट देवमूर्ति की (जीवन भर) विधिवत पूजा करने का प्रण**—मनुस्मृति में देवल को श्राद्धों में निमंत्रित करने से वर्जित किया गया है।[2] इस वर्णन में किसी धर्मग्रन्थ में सन्तोषप्रद विवेचन प्राप्त नहीं होता है। अपरार्क ने किसी स्मृतिवचन को उद्धृत करते हुये स्पष्ट किया है कि देवलक वह ब्राह्मण है जो किसी प्रतिमा का पूजन पारिश्रमिक के आधार पर तीन वर्षों तक करता है। वह श्राद्धों में पुरोहित होने योग्य नहीं बताया गया है जिससे लगता है कि देवलक ब्राह्मण विद्यार्थी हो सकता है।

**शिष्टों द्वारा गोतृप्ति मात्र जल से आचमन क्रिया**—धर्मसूत्रों एवं स्मृतिग्रंथों में यह वर्णित है कि पृथ्वी पर एकत्र जल पवित्र है और आचमन-विहित है, यदि वह एक गाय की प्यास बुझाने भर के लिए पर्याप्त हो। किन्तु इसे सम्भवतः स्वास्थ्य संबंधी बातों के आधार पर आचमन आदि के लिए वर्जित कर दिया गया।

**अग्निहोत्र**—वैदिक साहित्य से पता चलता है कि तत्कालीन समाज में अग्निहोत्र आवश्यक था।[3] कालान्तर में गृह्यसूत्रों, स्मृतियों एवं पुराणों में भी इसका

---

१—आश्वलायन, श्रौ० सू०, १२।६।१२-१३।
जैमिनिसूत्र, ३।७।२८-२९।
याज्ञ० स्मृ०, १।२५८-२५९।

२—बौधा० ध० सू०, १।५।६५; मनु स्मृ०, ५।१२८; याज्ञ० स्मृ०, १।१९२; वसिष्ठ स्मृ०, ३।३५;
विष्णु० २३-४३।
तु० की०, बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० ७९-८०।

३—तैत्ति० सं०, १।५।९, अग्निहोत्रं जुहोति स्वर्गकामः। शबरसूत्र, १-४-३।
कुल्लूकभाष्य, मनु०, ११।४१;

विवेचन है।[1] किन्तु अग्निहोत्र के कलिवर्ज्य में विवाद है। निर्णयसिन्धु में व्याख्या की गयी है कि कलियुग में सर्वाधान अग्निहोत्र ही वर्जित है न कि अर्वाधान अग्निहोत्र। पराशरस्मृति[3] में अग्निहोत्र के विषय में स्पष्ट उक्ति नहीं किन्तु कलिवर्ज्य में वर्णित है। अतः कलियुग में अर्धाधान अग्निहोत्र कलिवर्ज्य में नहीं गिना जाता है।

**वर्णाश्रम संबंधी कलिवर्ज्य**—मदन पारिजात में क्षत्रिय तथा वैश्यों को इस (ब्रह्मचर्य) आश्रम के अयोग्य बताया गया है।[4]

**संन्यास**—व्यास ने कलियुग के ४४०० वर्षों के उपरान्त संन्यास को वर्जित किया है किन्तु देवल[5] के अनुसार जब तक समाज में चारों वर्णों का विभाजन चलता रहे और वेद का अध्ययन लोग करते रहें तब तक कलियुग में संन्यास ग्रहण किया जा सकता है। इस कलिवर्ज्य के विषय में संदेह है क्योंकि आज भी लोग संन्यासी हो रहे हैं।

**लम्बी अवधि तक ब्रह्मचर्य**—वैदिकसाहित्य, सूत्रों, स्मृतियों तथा पौराणिक ग्रन्थों में अध्ययन की सुविधा के लिए जीवन की निश्चित अवस्था थी।

**नैष्ठिक ब्रह्मचर्य**—वैदिक ब्रह्मचारियों के दो प्रकार—उपकुर्वाण तथानैष्ठिक—थे।२ ऐसा प्रतीत होता है कि इसमें बहुत ही कष्ट साध्य जीवन व्यतीत करना पड़ता था। वासनाएँ प्रबल होती हैं। अतः अपरार्क ने बृहन्नारदीयपुराण से उद्धरण देते हुए इस ब्रह्मचर्य को वर्जित कर दिया।[6]

---

१—स्मृ० च०, कलिवर्ज्य भाग।

२—हेमाद्रि, प्रायश्चित्त खण्ड, पृ० ९०।

३—पराशर, स्मृ०, १।३१।

४—मदनपारिजात, पृ० ३६५; ३७३।
तु० की०, बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० ६०—६१।

५—निर्णयसिन्धु, ३, पूर्वार्द्ध, पृ० ३७, स्मृतिमुक्ताफल, वर्णाश्रम, पृ० १७६, यतिधर्मसंग्रह, पृ० २—३।

६—बृहन्नारदीयपुराण, २३।१५।
स्मृतिचन्द्रिका, पृ० ४७४। तु० की०, बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० ४६-४८।

**यति द्वारा उस घर में जिसके निकट वह सायंकाल ठहरा हो (भिक्षार्थ) रहना**–संन्यासी (यति) को अपना निवास बदलते रहना उसका धर्म बताया गया है। शंख के अनुसार संन्यासी या यति किसी खाली घर में, या वहां जहां सूर्य अस्त हो जाय, रुक जाने का अधिकारी है।[1] कृष्णभट्ट के विचार से कलिवर्ज्य दोपहर में भिक्षा-याचना की अनुमति देता है।[2]

**ब्रह्मचर्य काल के अन्त में गुरु दक्षिणा मांगना**–प्राचीन व्यवस्था के अनुसार गुरुदक्षिणा के विषय में कोई समझौता नहीं किया जाता था। प्राचीन साहित्य में अनेक उपाख्यान उपलब्ध होते हैं। इससे गुरु द्वारा अपेक्षित मांगों को अमान्य तो स्वीकार किया गया है किन्तु विद्यार्थी द्वारा स्वतः प्रदत्त दक्षिणा को वर्जित नहीं किया गया है।[3]

**गुरु-पत्नी के प्रति शिष्य की गुरुवत् वृत्तिशीलता**—सूत्रों एवं स्मृतियों में शिष्य को गुरु के समान उनकी पत्नी या पत्नियों के प्रति वही सम्मान प्रदर्शित करने का विधान है। केवल प्रणाम करते समय पैर-छूना और उच्छिष्ट भोजन करना वर्जित है।[4] कुछ स्मृतियों में पैर-छूना वर्जित है।[5] यात्रा से प्रत्यागत होने पर एक बार पैर छूने का विधान है। शिष्य बहुधा युवक होते थे और गुरुपत्नी भी युवावस्था की हो सकती थी। संभवत इसी हेतु वर्जित हो। इससे स्पष्ट होता है कि यहां कलिवर्ज्य के द्वारा मनु एवं विष्णु के नियमों का पालन कराया जाता है। स्मृतिकौस्तुभ एवं

---

१—शंख, ७।६।

२—निर्णयसिन्धु, पृ० १३१०।

३—बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० ५१।

४—आप० ध० सू०, १।२।७।२७, मनु स्मृ०, २।२१०; विष्णु०, ३३।१–२, गौतम०, २।३१–३४।

५—मनु स्मृ०; २।२१२, २१६, २१७, विष्णु स्मृ०, ३२।१३–१५, तु० कौ०, बटुकनाथ भट्टाचार्य, कलिवर्ज्य, पृ० ५०।

धर्मसिन्धु[1] में यह मत प्रतिपादित किया गया है कि इस कलिवर्ज्य से याज्ञवल्क्य स्मृति[2] में वर्णित यह नियम कट जाता है कि नैष्ठिक ब्रह्मचारी मृत्यु तक स्व गुरु या गुरु पुत्रों अथवा (इन दोनों के अभाव में) गुरुपत्नी के यहाँ रह सकता है।

